उद्गीतैरङ्गनानामरुणमणिरणन्नूपुरारावहृद्यै
रुद्राहस्नानवेलां कथयति भवतः सिद्धये सिद्धलोकः ॥ (१)

विदू। (आकर्ण्य) भो वअस्स ! दिट्ठिआ आगदं ह्नवणअं (२)

नायकः। (सहर्षं) यद्येवं किमिदानीमिह स्थितेन। आगच्छ। तातं नमस्कृत्य स्नानभूमिमेव गच्छावः॥

इति निष्क्रान्ताः सर्वे॥

द्वितीयोऽङ्कः।

---

(२) भो वयस्य ! दिष्ट्या आगतं स्नपनकं ॥

...वं तथोक्तः सिद्धलोकः अरुण...हृद्यैः अरुणा अव्यक्तरागाः कृष्णलोहितमिश्रा इत्यर्थः अथवा कपिला नीलपीतमिश्राः “अरुणोऽव्यक्तरागेऽर्के सन्ध्यारागेऽर्कसारथौ। निःशब्दे कपिले कुष्ठभेदे ना तु गुणिनि लिङ्गि”ति मेदिनी, मणयो येषु ते तथोक्ताः रणन्तः शब्दायमानाश्च ये नूपुराः तेषां आरावेण रवेण हृद्यैः मधुरैः अङ्गनानां कामिनीनां “विशेषस्त्वङ्गना भीरुः कामिनी वामलोचने”त्यमरः, उद्गीतैः गानैः करणैः भवतः सिद्धये मङ्गलाद्यर्थलाभार्थं उद्वाहस्नानवेलां विवाहमङ्गलस्नानकालं कथयति सूचयति। अत्र वृत्तं स्रग्धरा लक्षणमुक्तं प्राक्। (१)

तृतीयोऽङ्कः ।

(ततः प्रविशति मत्तो विचित्रविह्वलवेशश्चषकहस्तो विटः स्कन्धारोपित-
सुराभाण्डश्चेटश्च *) ॥

विटः । णिच्चं जो पिवइ सुरं जणस्स पिअसङ्गमञ्च जो कुणइ ।
अह ते द्दो अवि देवा बलदेवो कामदेवो अ ॥
सफलं क्खु मे सेहरअस्स जीविअं ॥
वच्छत्थलम्मि दइआ णीलुप्पलवासिआ मुहे मइरा ।
सीसम्मि अ सेहरओ णिच्चं विअ वेढ़िआ जस्स ॥ (प्रस्खलन्)(१)

---

(१) नित्यं यः पिबति सुरां जनस्य प्रियसङ्गमञ्च यः करोति।
अथ तौ द्वावपि देवौ बलदेवः कामदेवश्च ॥ †
सफलं खलु मे शेखरकस्य जीवितम् ।
वक्षःस्थले दयिता नीलोत्पलवासिता मुखे मदिरा।
शीर्षे च शेखरको नित्यमिव वेष्टिका यस्य ॥ ‡

---

* विचित्रविह्वलवेशः विचित्रः विविधवर्णः विह्वलः विस्रस्तश्च वेशो यस्य सः । चषकहस्तः चषकं पानपात्रं हस्ते यस्य सः : "चषकोऽस्त्री पानपात्रे मधुमद्यप्रभेदयो"रिति मेदिनी । विटः "सम्भोगहीन-सम्पद्‌ विटस्तु धूर्त्तः कलैकदेशज्ञः । वेशोपचारकुशलो वाग्मी मधुरोऽथ बहुमतो गोष्ठ्या"मिति साहित्यदर्पणम् । चेटः भृत्यविशेषः ।

† नित्यमिति । यो जनः नित्यं सुरां मद्यं पिबति यः जनस्य प्रिय-सङ्गमं प्रियतमसंयोगं च करोति अथ इति कार्त्स्न्ये "मङ्गलानन्तरारम्भ-प्रश्नकार्त्स्न्येष्वथोऽथ" इत्यमरः, तौ द्वौ अपि देवौ भवत इति शेषः बलदेवः बलरामः सुराप इति शेषः (cf. Meghaduta, "हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे") कामदेवश्च प्रियसङ्गमकारीत्यर्थः । इयमार्या ।

‡ वक्ष इति । यस्य मम वक्षःस्थले उरसि दयिता प्रिया मुखे नीलो-

अरे को मं चालेदि । (सहर्षम्) अवस्सं णोमालिआ मं परिहसदि ॥ (१)

चेटः । भट्टक ण अ दाव सा अज्जवि इहागच्छदि ॥ (२)

विटः । (सरोषम्) पढमपहरे ज्जेव्व मलयवदीए विवाहमङ्गलं णिव्वुत्तं । ता कीस सा दाणीं पभादेऽवि णागच्छदि । (विचिन्त्य सहर्षम्) अहवा विवाहमहूसवे सव्वो एव्व पिअपणइणीजणसणाहो सिद्धविज्जाहरलोओ कुसुमाअरुज्जाणे आपाणअसोक्खमणुभविस्सदित्ति तक्केमि तहिं जेव्व णोमालिआ मं अवेक्खमाणा चिट्ठदि । ता तहिं जेव्व गमिस्सं । कोदिसो णोमालिआए विणा सेहरओ (मस्त- कमभिमृशति) । (३)

---

(१) अरे को मां चालयति । अवश्यं नवमालिका मां परिहसति ।

(२) भर्त्तः न च तावत् सा अद्यापि इहागच्छति ।

(३) प्रथमप्रहरे एव मलयवत्या विवाहमङ्गलं निर्वृत्तम् । तत् कथं सा इदानीं प्रभातेऽपि नागच्छति । अथवा विवाहमहोत्सवे सर्व एव प्रियप्रणयिनीजनसनाथः सिद्धविद्याधरलोकः कुसुमाकरोद्याने आपानसौख्यमनुभविष्यतीति * तर्कयामि तत्रैव नवमालिका मां अपेक्षमाणा तिष्ठति । तत्तत्रैव गमिष्यामि । कीदृशो नवमालिकया विना शेखरकः ।

तृपलवासिता नीलपद्मैः सुरभीकृता मदिरा मद्यं शीर्षे मस्तके शेखरकः माल्यविशेषः "उत्तमाङ्गं शिरः शीर्षं" "शिखास्वापीड़शेखरौ" वित्यमर- [illegible]मरः । चेटिका किङ्करी नित्यमिव सर्वदैव वर्त्तते इति शेषः । अथवा पूर्वोक्ता दयितादयः चेटिका इव वशवर्त्तिन्यादिति भावः । सुरापत्वादस्य चेटयोपमायां न दोष इति विभाव्यम् ।

* प्रियप्रणयिनीजनसनाथः श्लोकस्थितः इयमेव रीतिः पानस्य पुराणेषु (cf. Meghaduta, "यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि

चेटः । एदु एदु भट्टके । एदं कुसुमाअरुज्जाणं । ता पविसदु भट्टके । (उभौ प्रवेशं नाटयतः) ॥ (१)

(ततः प्रविशति स्कन्धन्यस्तवस्त्रयुगो विदूषकः ।) *

विदू । सम्पुणा मणोरहा पिअवअस्सस्स । सुदं क्खु मएवि पिअवअस्सो कुसुमाअरुज्जाणं गमिस्सदित्ति । ता जाव तहिं एव्व गमिस्सं । (परिक्रम्यावलोक्य च) इदं कुसुमाअरुज्जाणं जाव पविसामि णं । (प्रविश्य भ्रमरबाधां नाटयन्) अरे कीस उण दुट्टमहुअरा मं एव्व अभिभवन्ति । (आत्मानमाघ्राय) भोदु जाणिदं । जं तं मलअवदीबन्धजणेण जामातुअस्स वअस्सोत्ति कदुअ सबहुमाणं वसाकेहिं विचित्तिदोह्मि । सन्तानकुसुमसेहरअं अ मम सीसे पिणद्धं सो क्खु एसो अत्थाअरो अणत्थीभूदो । किं दाणिं एत्थ करइस्सं । अधवा एदेण ज्जेव्व मलअवदीसआसादो लद्धेण रत्तंसुअजुअलेण इत्थिआवेसं विहिअ उत्तरीअकआवगुण्ठणो गमिस्सं । पेच्छामि दाव किं दासीए पुत्ता महुअरा करइस्सन्ति ॥ (तथा करोति) ॥ (२)

---

(१) एत एत भर्त्तः । इदं कुसुमाकरोद्यानं । तत् प्रविशतु भर्त्ता ।

(२) सम्पूर्णा मनोरथाः प्रियवयस्यस्य । श्रुतं खलु मयापि प्रियवयस्यः

ज्योतिष्कायाकुसुमरचितान्यु त्तमस्तोमजायाः । आसेवन्ते मधु रतिफलं कल्पवृक्षक्षतं त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहते"ष्विति) आपान-सौख्यं आपीयते अस्मिन्निति आपनं पानभूमिः तत्र यत् सौख्यं सुखं तत् ।

* स्कन्धन्यस्तवस्त्रयुगः स्कन्धे न्यस्तं स्थापितं वस्त्रयोः युगं युग्मं येन सः " युगं युग्मं कृतादिष्वि"त्यमरः ।

टः। (निरूप्य सहर्षम्) अरे चेड़ा। (अङ्गुल्या निर्दिश्य सहासम्) एसा क्खु णोमालिआ आअदा। मं पेक्खिअ चिरस्स आअदोत्ति कुविदा अवगुण्ठणं कदुअ अण्णदो गच्छदि। ता कण्ठे गेह्णिअ पसादेमि णं। (सहसोपसृत्य कण्ठे गृहीत्वा हस्ते ताम्बूलं दातुमिच्छति) ॥ (१)

कुसुमाकरोद्यानं गमिष्यतीति। तद्यावत्तत्रैव गमिष्यामि। इदं कुसुमाकरोद्यानं। यावत् प्रविशाम्येतत्। अरे कथं पुनर्दुष्टमधुकरा मामेव अभिभवन्ति। भवतु ज्ञातं। यत्तन्मलयवतीबन्धुजनेन जामातुर्वयस्य इति कृत्वा सबहुमानं वर्णकैर्विलिप्तोऽस्मि। सन्तानकुसुमशेखरकश्च मम शीर्षे पिनद्धः स खलु एषः अत्यादरः अनर्थीभूतः। किमिदानीमत्र करिष्यामि। अथवा एतेनैव मलयवतीसकाशाल्लब्धेन रक्तांशुकयुगलेन स्त्रीवेषं विधाय उत्तरीयकृतावगुण्ठनो गमिष्यामि। प्रेक्षे तावत् किं दास्याः पुत्रा मधुकराः करिष्यन्ति। *

(१) अरे चेट एषा खलु नवमालिका आगता। मां प्रेक्ष्य कथं चिरस्यागत † इति कुपिता अवगुण्ठनं कृत्वान्यतो गच्छति। तत् कण्ठे

---

* दुष्टमधुकरा दुष्टभ्रमरा मामेव अभिभवन्ति सर्वाङ्गेषु उपविश्य क्लिश्नन्ति। ज्ञातं भ्रमराभिभवकारणमिति शेषः। वर्णकैः विलेपनद्रव्यैः। सन्तानकुसुमशेखरकश्च देवतरुविशेषपुष्पनिर्मितशिरोमाल्यमित्यर्थः: "पञ्चैते देवतरवो मन्दारः पारिजातकः। सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दन" मित्यमरः। पिनद्धः बद्धः (अपि पूर्वात् नह्यतेः कर्मणि क्तः अपेः अकारलोपः तदुक्तं "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः। आपञ्चैव हलन्तानां यथा वाचा निशा दिशे"ति।) उत्तरीयकृतावगुण्ठनः उत्तरीयेण कृतं अवगुण्ठनं मुखाच्छादनं येन स तथोक्तः। दास्याः पुत्राः आक्रोशोक्ति (विभाषितत्वादलुक् समासः "षष्ठ्या आक्रोशे"ति।)

† चिरस्य बहुक्षणात् परमित्यर्थः (चिरस्येति षष्ठ्यन्तमव्ययं "चिराय चिररात्राय चिरस्याद्याश्चिरार्थका" इत्यमरः)।

विदू। (मद्यगन्धं सूचयन् नासिकां गृहीत्वा पराङ्मुखः * स्थित्वा) कहं एक्काणं † महुअराणं सआसादो परिब्भट्टो दाणिं अण्णस्स दुट्टमहुअरस्स मुहे पडिदोम्हि ॥ (१)

विटः। कहं कोवेण परम्मुहीभूदा (प्रणामं कुर्वन् विदूषकस्य चरणमात्मनः शिरसि कृत्वा)। पसीद णोमालिए पसीद ॥ (२)

(ततः प्रविशति चेटी ।)

चेटी। आणत्तम्हि भट्टिदारिआए। हञ्जे। णोमालिए कुसुमाअरुज्जाणं गदुअ उज्जाणपालिअं पल्लविअं भणाहि। अज्ज सविसेसं तमालवीहिअं सज्जीकरेहि। मलअवदीसहिदेण जामाउकेण तत्थ गन्तव्वंति। आणत्ता मए पल्लविआ। ता जाव रअणीविरहवड्ढिदुक्कण्ठं पिअवअस्सअं सेहरअं अण्णेसामि। (दृष्ट्वा) एसो सेहरओ। (सरोषम्) कहं अण्णं कम्मि इत्थिअं पसादेदि। ता इह ट्ठिदा एव्व जाणामि का एसेत्ति। (३)

गृहीत्वा प्रसादयत्येनाम्।

(१) कथमेकेषां † मधुकराणां सकाशात् परिभ्रष्ट इदानीमन्यस्य दुष्टमधुकरस्य मुखे पतितोऽस्मि।

(२) कथं कोपेन पराङ्मुखीभूता। प्रसीद नवमालिके! प्रसीद।

(३) आज्ञप्तास्मि भर्तृदारिकया। हञ्जे! नवमालिके कुसुमाकरो-

---

* पराङ्मुखः पराक् अन्यतो गतं मुखं यस्य स तथोक्तः (परापूर्वादञ्चतेः क्विपि परागिति सिद्धं)।

† एकेषां "एके मुख्यान्यकेवलाः" इत्यत्र अन्यार्थः एकशब्दः अतः "एकादन्यार्थं" इति बहुवचनमिति।

विटः । (सहर्षम्)

हरिहरपिआमहाणं पि गव्विदो जो ण जाणइ णमिदुं ।

सो सेहरओ चलणेसु तुज्झ णोमालिए पडइ ॥ (१)

विदू । दासीए पुत्ता मत्तवालआ कुदो एत्थो णोमालिआ । (२)

चेडी । (निरूप्य सस्मितम्) कहं मंति करिअ ‡ मदपर·

द्यानं गत्वा उद्यानपालिकां पल्लविकां भण । अद्य सविशेषं तमालवीथिकां सज्जीकुरु । मलयवतीसहितेन जामात्रा तत्र गन्तव्यमिति । आज्ञप्ता मया पल्लविका । तद्यावत् रजनीविरहवर्द्धितोत्कण्ठं प्रियवयस्यं शेखरकमन्विष्यामि । एष शेखरकः । कथमन्यां कामपि स्त्रियं प्रसादयति । तदिह स्थितैव जानामि कैषेति । *

(१) हरिहरपितामहानामपि गर्वितो यो न जानाति नन्तुम् ।
स शेखरकश्चरणयोः तव नवमालिके पतति । †

(२) दास्याः पुत्र मत्तवालक कुतोऽत्र नवमालिका ।

---

* तमालवीथिकां तमालानां वीथिका श्रेणी तां "वीथ्यालिरावलिः पंक्तिः श्रेणी"त्यमरः । रजनीविरहवर्द्धितोत्कण्ठं रजन्या रात्रेः विरहेण अभावेन वर्द्धिता उत्कण्ठा अत्युत्कटप्राप्तीच्छा यस्य तं तथोक्तं ।

† हरीति । हरिहरपितामहानां हरिः विष्णुश्च हरः शिवश्च पितामहः ब्रह्मा च "ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामह" इत्यमरः, तेषामपि समक्षे इति शेषः गर्वितः अहङ्कारी यः नन्तुं नमस्कर्तुमित्यर्थः न जानाति कदापि एतानपि न प्रणमतीति भावः । हे नवमालिके ! स तादृशो गर्वित इत्यर्थः शेखरकः तव चरणयोः पतति अतस्त्वयावश्यं प्रसत्तव्यमिति भावः । ‡ मामिति ज्ञात्वा नवमालिकेति मत्वेत्यर्थः ।

व्वसेण सेहरएण अज्ज अत्तेओ पसादीअदि। ता जाव अलीअकोवं करिअ दुवेवि एदे परिहसिस्सं। (१)

चेटः। (चेटीं दृष्ट्वा शेखरकं हस्तेन चालयन्) भट्टका मुञ्च एदं। ण भोदि एसा णोमालिआ। एसा उण रोसारत्तेहिं लोअणेहिं पेक्खन्ती आअदा॥ (२)

चेटी। (उपसृत्य) सेहरअ का उण एसा पसादीअदि॥ (३)

विदू। (अवगुण्ठनमवतार्य्य) भोदि कोवि बह्मणो अहं मन्दभाअधेओपउत्तो। (४)

विटः। (विदूषकं निरूप्य) अरे कविलमंकडुआ तुमम्पि सेहरअं पदारेसि। अरे चेड़ा गेह्ण एदं। जाव णोमालिअं पसादेमि॥ (५)

---

(१) कथं मामिति कृत्वा मदपरवशेन शेखरकेण आर्य्योऽत्रेयः प्रसाद्यते। तद्यावत् अलीकं कोपं कृत्वा द्वावप्येतौ परिहसिष्यामि।

(२) भर्त्तर्मुञ्चैतं। न भवत्येषा नवमालिका। एषा पुनारोषारक्तैर्लोचनैः प्रेक्षमाणा आगता॥ *

(३) शेखरक का पुनरेषा प्रसाद्यते।

(४) भवति कोऽपि ब्राह्मणोऽहं मन्दभागधेयोपयुक्तः। †

(५) अरे कपिलमर्कट त्वमपि शेखरकं प्रतारयसि ‡। अरे चेट गृहाणैतम्। यावत् नवमालिकां प्रसादयामि॥

---

* रोषारक्तैः रोषेण कोपेन आरक्तैः लोहितवर्णैः। प्रेक्षमाणा पश्यन्ती त्वामिति शेषः।

† मन्दभागधेयोपयुक्तः मन्देन भागधेयेन भाग्येन दैहशात्याचारमाप्नैरिति भावः उपयुक्तः विशिष्टः।

‡ कपिलमर्कट कृष्णपीताभिश्रितवर्णवानर "मर्कटो वानरः

चेटः। जं भट्टके आणवेदि॥ (१)

विटः। (विदूषकं सख्या वेश्याः पादयोः पतति) पसीद णोमालिए पसीद॥ (२)

विदू। (आत्मगतम्) एसो मे अवक्कमिदुं अवसरो। (३) (पलायितुमीहते)॥

चेटः। (विदूषकं यज्ञोपवीते गृह्णाति। यज्ञोपवीतं त्रुट्यति) कहिं कहिं कविलमक्कडआ पलाअसि। (तदुत्तरीयेणैव गलके बद्ध्वाकर्षति)॥ (४)

विदू। भोदि णोमालिए पसीद मुञ्चावेहि मं॥ (५)

चेटी। (विहस्य) जइ भूमीए सीसं णिवेसिअ पादेसु मे पडसि॥ (६)

विदू। (सरोषम् सकम्पञ्च) भो गन्धव्वराअमित्तो बम्हणो भविअ दासीए धीआए पादेसु पडइस्सं॥ (७)

---

(१) यत् भर्त्ताज्ञापयति।

(२) प्रसीद नवमालिके! प्रसीद।

(३) एष मेऽपक्रमितुमवसरः।

(४) क्व क्व कपिलमर्कट पलायसे।

(५) भवति नवमालिके! प्रसीद मोचय माम्।

(६) यदि भूमौ शीर्षं निवेश्य पादयोः मे पतसि।

(७) भो गन्धर्वराजमित्रः ब्राह्मणो भूत्वा दास्याः पुत्र्याः पादयोः पतिष्यामि।*

कोश" इत्यमरः, प्रतारयसि वञ्चयसि इत्यर्थः। धवचुलिकादिना खीवेशं गृहीत्वा वञ्चयसि इत्यर्थः।

* गन्धर्वराजमित्रः गन्धर्वराजः मित्रं यस्य स तथोक्तः। मित्रमिति पाठे तु षष्ठीसमासः।

चेटी। (अङ्गुल्या तर्जयन्ती सस्मितं) दाणिं पाडइस्सं। सेहरअ उट्ठेहि। पसण्णा दे अहं। (कण्ठे गृह्णाति) एसो उण जामादुअस्स पिअवअस्सो तुए खलीकदो। एव्वञ्च सुणिअ कदावि भट्टा मित्तावसू तव कुप्पइ। ता आदरेण सम्माणेहि णं॥ (१)

विटः। जं णोमालिआ आणवेदि। (विदूषकं कण्ठे गृहीत्वा) अज्ज तुमं मए सम्बन्धिओत्ति करिअ परिहसिदो। (घूर्णन्) किं सच्चकं जेव्व सेहरओ। किं कदो परिहासो। (उत्तरीयं वर्त्तुलीकृत्य आसनं ददाति) इह उवविसतु सम्बन्धिओ॥ (२)

विदू। (सगतम्) दिट्ठिआ अवगदो विअ से मदावेओ। (उपविशति)॥ (३)

विटः। णोमालिए! उवविस तुमम्मि एदस्स पासे। जेण दुवेवि तुम्हे समं एव्व सम्माणइस्सं॥ (४)

---

(१) इदानीं पातयिष्यामि। शेखरक उत्तिष्ठ। प्रसन्ना तेऽहम्। एषः पुनर्जामातुः प्रियवयस्यस्त्वया खलीकृतः *। एतच्च श्रुत्वा कदापि भर्त्ता मित्रावसुस्तव कुप्यति। तदादरेण सम्मानयैनम्।

(२) यन्नवमालिकाज्ञापयति। आर्य्य त्वं मया सम्बन्धीति कृत्वा परिहसितः। किं सत्यमेव शेखरकः। किं कृतः परिहासः। इह उपविशतु सम्बन्धी।

(३) दिष्ट्यापगत इवास्य मदावेगः।

(४) नवमालिके! उपविश त्वमपि एतस्य पार्श्वे। येन द्वावपि युवां सममेव सम्मानयिष्यामि।

---

* खलीकृतः खलः खलः अधमः कृतः अधमीकृतः अपमानित इत्यर्थः "खलं भस्मानकल्कं च नीचक्रूराधमे त्रिष्वि"त्यमरः।

चेटी । (विटस्योपविशति) ॥

विटः । (चषकमादाय) अरे चेड़ा सुभरिदं क्खु एदं करेहि चसकं सुराए । (१)

चेटः । (नाट्येन चषकभरणं करोति) ॥

विटः । (स्वशिरःशेखरात् पुष्पाणि गृहीत्वा चषके विन्यस्य जानुभ्यां स्थित्वा नवमालिकाया उपनयति) णोमालिए ! आ क्खअ देहि एदं एदस्स ॥ (२)

चेटी । (सस्मितम्) जं सेहरओ भणादि । (तथा कृत्वा विटस्यार्पयति) ॥ (३)

विटः । (विदूषकस्य चषकमर्पयति) एदं णोमालिआमुहसंसग्गसविसेसवासिअरसं सेहरअस्स केणवि अणासादिदपुव्वं । ता पिवेहि एदं । किं ते अदोवि अवरं सम्माणं करइस्सं ॥ (४)

---

(१) अरे चेट सुपूरितं खल्वेतं चषकं कुरु सुरया ।

(२) नवमालिके ! आस्वाद्य देह्येतमेतस्य ।

(३) यत् शेखरको भणति ॥

(४) इदं नवमालिकामुखसंसर्गसविशेषवासितरसं शेखरकान्येन केनाप्यनास्वादितपूर्वं । तत् पिबैतत् । किं ते अतोऽप्यपरं सम्मानं करिष्यामि । *

---

* नव...रसं नवमालिकायाः मुखसंसर्गेण आस्वादनेनेत्यर्थः सविशेषं सातिशयं वासितः सुरभीकृतः रसः मद्यरस इत्यर्थः यस्य तत् तथोक्तं । शेखरकान्येन शेखरकादन्येन ।

विदू । (सवैलक्ष्यस्मितं कृत्वा) सेहरअ बह्मणो क्खु अहं ॥ (१)

विट । जदि तुमं बह्मणो । ता कहिं ते णवसुत्तं ॥ (२)

विदू । तं क्खु मे इमिणा चेड़ेण कट्टोप्पमाणं छिग्णं ॥ (३)

चेटी । (विहस्य) जइ एव्वं ता वेदक्खराइम्मि दाव कतिवि उदाहर ॥ (४)

विदू । भोदि इमिणा सोधुगन्धेण कहिं वेदक्खराइं । अहवा किं मम भोदिए समं विवादेण । एसो दे बह्मणो पादेसु पड़दि (इति पादयोः पतितुमिच्छति) ॥ (५)

चेटी । (हस्ताभ्यां निवार्य) मा क्खु एव्वं करेदु अज्जो । सेहरअ ओसर ओसर । बह्मणो क्खु एसो । (विदूषकस्य पादयोः पतति) । अज्ज ण तुए कुविदव्वं । सम्बन्धिकानुरूवो क्खु ऐसो मए परिहासो कदो ॥ (६)

---

(१) शेखरक ब्राह्मणः खल्वहम् । *

(२) यदि त्वं ब्राह्मणः । तत् क्व ते नवसूत्रम् ।

(३) तत् खल्वनेन चेटेन कष्टप्रमाणं छिन्नम् ।

(४) यद्येवं तद्वेदाक्षराण्यपि कत्यपि उदाहर ।

(५) भवति अनेन शीधुगन्धेन क्व वेदाक्षराणि † । अथवा किं मम भवत्या सह विवादेन । एष ते ब्राह्मणः पादयोः पतति ।

(६) मा खल्वेवं करोत्वार्यः । शेखरक अपसर अपसर । ब्राह्मणः

---

* ब्राह्मणस्य मद्यपानं निषिद्धं तदुक्तं "तस्माद्ब्राह्मेयं विप्रेण सुराभद्यं कथञ्चन । ब्राह्मणस्यापि न पेया वै सुरा पापभयावहा" इति भविष्ये । † शीधुगन्धेन मद्यगन्धेन । क्व कुत्र स्थाने । वेदाक्षराणि गताचीर्ष्यः ।

विटः। अहम्मि णं पसादेमि। (पादयोर्निपत्य) मरिसेदु मरिसेदु अज्जो जं मए मदपरव्वसेण अवरद्धं। जेण अहं णोमालिआए सह आवाणअं गमिस्सं॥ (१)

विदू। मरिसिदं मए। गच्छ तुम्हे। अहम्मि पिअवअस्सं पेक्खामि॥ (२)

(निष्क्रान्तौ विटचेट्या सह चेटश्च)॥

विदू। अदिक्कन्तो बह्मणस्स अकालमिच्चू। ता जाव अहम्मि मत्तवालअसङ्गदूसिदो इह दिग्घिकाए ण्हाइस्सं। (तथा करोति। नेपथ्याभिमुखमवलोक्य) एसो पिअवअस्सो वि रुक्किणीं विअ हरी मलअवदीं अवलम्बिअ इदो एव्व आअच्छदि। ता जाव पासपरिवत्ती होमि॥ (३)

खल्वेषः। आर्य्यं न त्वया कोपितव्यं। सम्बन्धिकानुरूपः खल्वेष मया परिहासः कृतः।

(१) अहमप्येनं प्रसादयामि। मर्षयतु मर्षयत्वार्य्यः यत् मया मदपरवशेनापराद्धं *। येनाहं नवमालिकया सहापानं गमिष्यामि।

(२) मर्षितं मया। गच्छतं युवां। अहमपि प्रियवयस्यं प्रेक्षे।

(३) अतिक्रान्तो ब्राह्मणस्याकालमृत्युः। तद्यावदहमपि मत्तवालक-सङ्गदूषित इह दीर्घिकायां स्नास्यामि †। एष प्रियवयस्योऽपि रुक्मिणी-मिव हरिर्मलयवतीमवलम्ब्य इत एवागच्छति। तद्यावत् पार्श्वपरिवर्त्ती भवामि।

---

* मर्षयतु क्षमतां। यत् मयेत्यत्र उत्तरवाक्ये यच्छब्दप्रयोगात् न तच्छब्दाकाङ्क्षा।

† मत्तालकसङ्गदूषितः सुरापानोन्मत्तजनसंसर्गदूषितः तदुक्तं

(ततः प्रविशति गृहीतवरनेपथ्यौ नायको मलयवती। विभवतश्च परिवारः)*

नायकः। (मलयवतीमवलोकयन् सहर्षम्)।

दृष्टा दृष्टिमधो ददाति कुरुते नालापमाभाषिता
शय्यायां परिवृत्य तिष्ठति बलादालिङ्गिता वेपते।
निर्यान्तीषु सखीषु वासभवनान्निर्गन्तुमेवेहते
जाता वामतयैव मेऽद्य सुतरां प्रीत्यै नवोढा प्रिया॥ १॥

(मलयवतीं पश्यन्) प्रिये मलयवति

हुङ्कारं ददता मया प्रतिवचो यन्मौनमासेवितं
यद्दावानलदीप्तिभिस्तनुरियं चन्द्रातपैस्तापिता।

"महापातकिसंसर्गे स्नानमेव विधीयते। संस्पृष्टस्तु यदा भुङ्क्ते तत्प्रकृच्छ्रं तदाचरे"दिति पैठीनसिना।

* गृहीतवरनेपथ्यौ गृहीतवरनेपथ्या च गृहीतवरनेपथ्यश्च तौ ("पुमान् स्त्रिया" इत्येकशेषः)। विभवतश्च विभवेन विशिष्टः समृद्धिमानित्यर्थः "विभवो द्रैयोश्चैश्वर्ये" इति मेदिनी।

दृष्टेति। नवोढा नवं नूतनं ऊढा परिणीता प्रिया मलयवतीत्यर्थः दृष्टा सती मयेति शेषः दृष्टिं अधो भूमिं प्रति ददाति क्षिपति आभाषिता सम्भाषिता सती मयेति शेषः आलापं उत्तरादिकं न कुरुते। शय्यायां परिवृत्य पराङ्मुखी भूत्वा तिष्ठति। बलात् बलमाश्रित्य (ल्यब्लोपे पञ्चमी) आलिङ्गिता मयेति शेषः वेपते कम्पते। सखीषु वासभवनात् वासगृहात् निर्यान्तीषु बहिर्गच्छन्तीषु सतीषु निर्गन्तुं बहिर्यातुमेव ईहते चेष्टते। वामतया प्रतीपत्वेन एव अद्य मे मम सुतरां (किमेतिङव्ययेत्यादिना आमु) सातिशयं प्रीत्यै आनन्दाय जाता भूता। अत्रापि वृत्तं शार्दूलविक्रीडितम्। (१)

हुङ्कारमिति। मया कर्त्रा हुङ्कारं हुमित्यव्यक्तशब्दं प्रतिवचः प्रत्युत्तरं केनापि पृष्टस्य वाक्यस्येति शेषः ददता सता यत् मौनं वाग्यमन

ध्यातं यत् सुबहून्यनन्यमनसा नक्तन्दिनानि प्रिये
तस्यैतत् तपसः फलं मुखमिदं पश्यामि यत्तेऽधुना ॥ १ ॥

नायिका । (अपवार्य्य) हञ्जे चदुरिए ! ण केवलं दंसणीओ पिअम्पि भणिदुं जाणादि ज्जेव ॥ (२)

चेटी । (विहस्य) अदिपक्खवादिणि सच्चकं ज्जेव्व एदं । किं एत्थ पिअवअणं । (३)

नायकः । चतुरिके ! आदेशय मार्गं कुसुमाकरोद्यानस्य ॥

चेटी । एदु एदु भट्टा ॥ (४)

---

(२) हञ्जे चतुरिके ! न केवलं दर्शनीयः । प्रियमपि भणितुं जानात्येव ।

(३) अतिपक्षपातिनि सत्यकमेवैतत् । किमत्र प्रियवचनं । *

(४) एतु एतु भर्त्ता ।

सादेवितं कृतं, दावानलदीप्तिभिः दावस्य वनस्य अनलः वह्निः अथवा दाव एव वह्निः (भूतऽच्चवत् अपुनरुक्तिः) "वने च वनवह्नौ च दवोदाव इहेष्यते" इत्यमरः, तस्य दीप्तिरिव दीप्तिर्येषां ते तथोक्ताः अत्युष्णत्वेन प्रतीयमानैरिति शेषः चन्द्रातपैः चन्द्रकिरणैः यत् इयं मदीया तनुः शरीरं तापिता हे प्रिये ! अनन्यमनसा नास्ति अन्यस्मिन् विषये मनो यस्य तथोक्तेन मया यत् सुबहूनि अनेकानि नक्तन्दिनानि रात्रिन्दिवं ध्यातं चिन्तितं तस्य पूर्वोक्तस्य मौनावलम्बनातपस्थितिध्यानरूपस्य तपसः एतत् फलं सिद्धिरूपं भवतीति शेषः यत् ते तव इदं मुखं अधुना इदानीं पश्यामि अहमिति शेषः । अत्रापि वृत्तं शार्दूलविक्रीड़ितम् । (१)

* अतिपक्षपातिनि पक्षे पततीति तत् सम्बुद्धौ जीमूतवाहने अत्यादरवतीत्यर्थः ।

नायकः। (परिक्रम्य नायिकां निर्दिश्य) स्वैरं स्वैरमागच्छतु भवती ॥

खेदाय स्तनभार एव किमु ते मध्यस्य हारोऽपरः
श्राम्यत्यूरुयुगं नितम्बभरतः काञ्च्यानया किं पुनः।
शक्तिः पादयुगस्य नोरुयुगलं वोढुं कुतो नूपुरौ
स्वाङ्गैरेव विभूषितासि वहसि क्लेशाय किं मण्डनम् ॥ (१)

चेटी। एदं क्खु, तं कुसुमाअरुज्जाणं। ता पविसदु भट्टा। (२)

---

(२) एतत् खलु तत् कुसुमाकरोद्यानं। तत् प्रविशतु भर्ता।

खेदायेति। ते तव स्तनभारः पीवरपयोधरभार एव मध्यस्य कटेः अतिक्षीणत्वादिति भावः खेदाय क्लेशाय भवतीति शेषः अपरः अन्यः अधिकभारकारी हारः किमु अतिक्लेशकरो भवतीति भावः। ऊरुयुगं नितम्बभरतः अतिविशालश्रोणिभारात् श्राम्यति अनया भूषणार्थं स्वीकृतया काञ्च्या रसनया किं पुनः सातिशयं क्लिश्यत्येवेत्यर्थः। ऊरुयुगलं वोढुं पादयुगस्य चरणयुगलस्य शक्तिः सामर्थ्यं न नूपुरौ वोढुमिति शेषः कुतः नास्त्येवेत्यर्थः। स्वाङ्गैः अतिसुगठितस्तनादिभिरित्यर्थः एव न त्वन्यभूषणापेक्षेति भावः विभूषिता असि किं कथं क्लेशाय शरीरखेदायैवेति भावः मण्डनमलङ्कारं वहसि धारयसि त्वमिति शेषः। स्तनभार इत्यत्र मध्यादेः एकस्मिन् खेदकरे स्थिते हारस्यापादिसाधकान्तरसद्भावात् समुच्चयालङ्कारः तदुक्तं "तत् सिद्धिहेतावेकस्मिन् यत्रान्यत् तत्करं भवेत्। समुच्चयोऽसा"विति, तृतीयपादे तु अङ्गानां भूषणत्वोक्त्या अन्यालङ्कारापेक्षेपात् प्रतीपालङ्कारः तल्लक्षणं यथा "आक्षेप उपमानस्य प्रतीपमुपमेयता। तस्यैव यदि वा कल्प्या तिरस्कारनिबन्धन"मिति काव्यप्रकाशम्। (१)

(सर्वे प्रविशन्ति)

नायकः । (विलोक्य) अहो नु कुसुमाकरोद्यानस्य परा श्रीः । इह हि

निष्यन्दश्चन्दनानां शिशिरयति लतामण्डपं कुट्टिमानां
तारं धारागृहाणां ध्वनिमनु तनुते ताण्डवं नीलकण्ठः ।
यन्त्रोन्मुक्तश्च वेगाद् गलति विटपिनां पूरयन्नालवालान्
आपातोत्पीडहेलाहृतकुसुमरजःपिञ्जरोऽयं जलौघः ॥ (१)

अपि च

अमी गीतारम्भैर्मुखरितलतामण्डपभुवः
परागैः पुष्पाणां प्रकटपटवासव्यतिकराः ।

निष्यन्द इति । चन्दनानां चन्दनवृक्षाणां निष्यन्दः रसः कुट्टिमानां प्राङ्गणानां तत्र स्थितमित्यर्थः लतामण्डपं लतागृहं शिशिरयति शीतलं करोति (शिशिरशब्दात् "तत् करोती"त्यादिना णिच् ततो लट्) धारागृहाणां जलपातनार्थनिर्मितगृहविशेषाणां तारं अत्युच्चैः "तारोऽत्युच्चै"रित्यमरः, ध्वनिं शब्दं अनु तदनुसारेणेत्यर्थः नीलकण्ठः मयूरः "मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुग्"इत्यमरः, ताण्डवं नृत्यं "ताण्डवं नटनं नाट्यं लास्य"मित्यमरः, तनु करोतीत्यर्थः ("अनुर्लक्षणे" इति कर्मप्रवचनीयसंज्ञा "कर्मप्रवचनीययुक्ते द्वितीये"ति द्वितीया) । यन्त्रोन्मुक्तः यन्त्रात् जलोत्क्षेपणयन्त्रा त्यर्थः उन्मुक्तश्च आपात…पिञ्जरः आपातेन उच्चस्थानात् पतनेन "पातः पुंसि पतने तदात्वे च प्रकीर्त्तित" इति मेदिनी, ये उत्पीडाः फेणाः तैः हेलया अनायासेनेत्यर्थः "हेला स्त्रियामवज्ञायां विलासे वारयोषिता"मिति मेदिनी, आहृतैः संसृष्टैरित्यर्थः कुसुमरजोभिः पुष्पपरागैः पिञ्जरः पीतवर्णः "पिञ्जरोऽश्वान्तरे पीते क्लीबं स्वर्णे च पीतने" इति मेदिनी, अयं दृश्यमानः जलौघः जलप्रवाहः विटपिनां वृक्षाणां आलवालान् पूरयन् वेगात् गलति पतति । अत्र वृत्तं स्रग्धरा । तल्लक्षणमुक्तं प्राक् । (१)

पिबन्तः पर्य्याप्तं सह सहचरीभिर्मधुरसं

समन्तादापानोत्सवमनुभवन्तीव मधुपाः ॥ (१)

विदू। (उपसृत्य) जेदु जेदु भवं। सोत्थि भोदीए ॥ (२)

नायकः। वयस्य चिरादृष्टोऽसि ॥

विदू। भो वअस्स! लहुं एव्व आअदोह्मि। किं उण विवाहमहूसवमिलिदसिद्धविज्जाहराणां आपाणदंसणकोदूहलेण परिब्भमन्तो एत्तिअं वेलं चिट्ठिदोह्मि। ता तुमम्पि दाव पेक्ख ॥ (३)

---

(२) जयतु जयतु भवान्। स्वस्ति भवत्यै।

(३) भो वयस्य! लघ्वेवागतोऽस्मि। किं पुनर्विवाहमहोत्सवमिलितसिद्धविद्याधराणामापानदर्शनकौतूहलेन परिभ्रमन्नेतावतीं वेलां स्थितोऽस्मि तत् त्वमपि तावत् प्रेक्षस्व। *

अमी इति। अमी मधुपा (मधु पिबन्तीति "आतोऽनुपसर्गे" इति कः) गीतारम्भैः गुञ्जितैरित्यर्थः मुखरित...भुवः (मुखमस्तीति मुखराः "मुखकुञ्जेभ्यो रो वक्तव्यः") मुखराः शब्दायमानाः कृताः मुखरिताः लतामण्डपभुवः लतामण्डपस्थानानि यैः ते तथोक्ताः पुष्पाणां परागैः रजोभिः "परागः सुमनोरजः" इत्यमरः, प्रकट...व्यतिकराः प्रकटः व्यक्तः पटवासस्य चूर्णविशेषस्य "पिष्टातः पटवासक" इत्यमरः, व्यतिकरः साहश्यं येषु ते तथोक्ताः, सहचरीभिः सङ्गिनीभिः सह मधुरसं पर्य्याप्तं सातिशयं पिबन्तः समन्तात् चतुर्दिक्षु आपानोत्सवं आपाने पानभूमौ य उत्सव आनन्दः तं अनुभवन्तीवेत्युत्प्रेक्षा तल्लक्षणं "सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यदिति" मम्मटः। अत्र शिखरिणीछन्दः तल्लक्षणं यथा "रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणी"। (१)

* विवाह...विद्याधराणां विवाहमहोत्सवे मिलिता एकीभूताः ये सिद्धाश्च विद्याधराश्च तेषां। आपानदर्शनकौतूहलेन पानभूमिदर्शनकौतुकेन।

नायकः । एवं यथाह भवान् । (समन्तादवलोकयन्) वयस्य पश्य पश्य

स्निग्धाङ्गा हरिचन्दनेन दधतः सन्तानकानां स्रजो
माणिक्याभरणप्रभाव्यतिकरैश्चित्रीकृताच्छांशुकाः ।
सार्द्धं सिद्धजनैर्मधूनि दयितापीतावशिष्टान्यमी
मिश्रीभूय पिबन्ति चन्दनतरुच्छायासु विद्याधराः ॥ (१)

तदेहि वयमपि तां तमालवीथिं गच्छामः । (परिक्रामति) ॥

विदू । एसा क्खु तमालवीहिआ । एदं सञ्चरन्तो दाव परिखेदिदा विअ भोदी दीसइ । ता इह एव्व फलिहमणि-सिलाअले उवविसिअ वीसमम्ह ॥ (२)

---

(२) एषा खलु तामालवीथिः । एतां सञ्चरन्ती तावत् परिखेदितेव भवती दृश्यते । तदिहैव स्फटिकमणिशिलातले उपविश्य विश्रास्यावः ।

---

* स्निग्धेति । हरिचन्दनेन चन्दनविशेषेण स्निग्धाङ्गाः स्निग्धानि अङ्गानि येषां ते तथोक्ताः सन्तानकानां देवतरुविशेषपुष्पाणां स्रजः मालाः दधतः धारयन्तः ("नाभ्यस्ताच्छतुर्नुमि"ति नुमभावः) माणिक्य...व्यतिकरैः माणिक्यानां रत्नविशेषाणां आभरणानि अलङ्काराः तेषां प्रभाणां दीप्तीनां व्यतिकरैः व्यतिषङ्गैः मिश्रणैरित्यर्थः "अथ व्यतिकरः पुंसि व्यसन व्यतिषङ्गयो"रिति मेदिनी, चित्रीकृताच्छांशुकाः चित्रीकृतानि विविध-वर्णीकृतानि अच्छानि निर्मलानि "अच्छः स्फटिकभल्लूकनिर्मलेष्वि"ति मेदिनी, अंशुकानि सूक्ष्मवस्त्राणि येषां ते तथोक्ताः अमी विद्याधराः सिद्धजनैः सार्द्धं सह चन्दनतरुच्छायासु मिश्रीभूय एकीभूय दयितापीता-वशिष्टानि दयिताभिः वल्लभाभिः पीतानि पश्चात् अवशिष्टानि (पूर्व-कालेत्यादिना तत्पुरुषः) मधूनि मद्यानि "मधु मद्ये मधु दैत्ये मधु-मद्यरसेऽपि चे"त्यमरः, पिबन्ति । अत्रापि वृत्तं शार्दूलविक्रीडितम् । (१)

नायकः। वयस्य सम्यगुपलक्षितम्

एतन्मुखं प्रियायाः शशिनं क्षिप्त्वा कपोलयोः कान्त्या।
तापानुरक्तमधुना कमलं ध्रुवमीहते जेतुम्॥ (१)

(नायिकां हस्ते गृहीत्वा) प्रिये! इहोपविशामः॥

नायिका। जं अज्जउत्तो आणवेदि। (२)

(उभे उपविशन्ति)।

नायकः। (नायिकाया मुखमुन्नमय्य पश्यन्) प्रिये वृथैव त्वमाभिः कुसुमाकरोद्यानकुतूहलिभिः खेदिता। कुतः

एतत्ते भ्रूलतोल्लासि पाटलाधरपल्लवम्।
मुखं नन्दनमुद्यानमतोऽन्यत् केवलं वनम्॥ (३)

---

(२) यदार्यपुत्र आज्ञापयति।

एतदिति। प्रियायाः एतन्मुखं कपोलयोः गण्डयोः कान्त्या सौन्दर्येण शशिनं क्षिप्त्वा अवमन्य "क्षेपस्तु निन्दाविक्षेपलेपने" इति मेदिनी, ततोऽप्यधिकसुन्दरमित्यर्थः, अधुना तापानुरक्तं तापेन उष्णेन अनुरक्तं रक्तवर्णं यत् कमलं पद्मं जेतुमधःकर्तुं ईहते चेष्टते ध्रुवं निश्चये तर्के वा "ध्रुवः शङ्कौ हरे विष्णौ वटे चोत्तानपादजे। वसुयोगभिदोः पुंसि क्लीवं निश्चिततर्कयो"रिति मेदिनी। (१)

एतदिति। ते तव भ्रूलतोल्लासि भ्रुवौ लते इव ताभ्यां उल्लासि शोभमानं पाटलाधरपल्लवं पाटलौ श्वेतरक्तौ "श्वेतरक्तस्तु पाटलः" अधरौ ओष्ठौ "अधरस्तु पुमानोष्ठे" इति मेदिनी, पल्लवे किसलये इव यस्य तत् तथोक्तं (cf. Sakuntala, "अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू" इति) एतत् मुखं नन्दनं आनन्ददायकं इन्द्रवनमिति च गम्यते "नन्दनं वन"मित्यमरः, अतः मुखात् अन्यत् हीनमित्यर्थः उद्यानं केवलं वनं नतु आनन्ददायकमित्यर्थः। (२)

चेटी। (सस्मितम् विदूषकं निर्दिश्य) सुदं तुए भट्टिदारिअं कहं वण्णेदि। अज्ज उण अहं तुमं वण्णेमि॥ (१)

विदू। (सहर्षम्) भोदि जीवाविदोम्हि। ता करेदु भोदी पसादं। जेण एसो मं पुणोवि ण भणादि। जहा तुमं ईदिसो। तादिसो कविलमक्कडाआरोत्ति॥ (२)

चेटी। अज्ज! तुमं मए विवाहजागरणे णिद्दाअमाणणिमीलिअअच्छो सोहणो दिट्ठो। ता तह एव्व चिट्ठ जेण वण्णेमि। (३)

विदू। (तथा करोति)।

चेटी। (स्वगतम्) जाव एसो णिमीलिअअच्छो चिट्ठदि। ताव णीलरसाणुआरिणा तमालपल्लवरसेण मुहं कालीकरइस्सं। (उत्थाय तमालपल्लवं निष्पीड्य विदूषकस्य मुखं कालीकरोति)॥ (४)

(नायको नायिका च विदूषकं पश्यतः)॥

नायकः। वयस्य धन्यः खल्वसि योऽस्मासु तिष्ठत्सु भवानेवं वर्ण्यते॥ *

---

(१) श्रुतं त्वया भर्तृदारिकां कथं वर्णयति। अद्य पुनरहं त्वां वर्णयामि।

(२) भवति जीवितोऽस्मि। तत् करोतु भवती प्रसादं येनैष मां पुनरपि न भणति। यथा त्वमीदृशः। तादृशः कपिलमर्कटाकार इति।

(३) आर्य! त्वं मया विवाहजागरणे निद्रायमाणनिमीलिताक्षः शोभनो दृष्टः। तत्तथैव तिष्ठ येन वर्णयामि।

(४) यावदेव निमीलिताक्षस्तिष्ठति तावन्नीलरसानुकारिणा तमालपल्लवरसेन मुखं कालीकरिष्यामि।

---

* अस्मासु तिष्ठत्सु ("षष्ठी चानादरे" इति चकारात् सप्तमी)

नायिका। (नायकस्य मुखं दृष्ट्वा स्मितं करोति) ॥

नायकः। (नायिकामुखं दृष्ट्वा)

स्मितपुष्पोद्गमोऽयन्ते दृश्यतेऽधरपल्लवे।
फलं त्वन्यत्र मुग्धाक्षि! चक्षुषोर्मम पश्यतः। (१)

विदू। भोदि किं तुए किदं ॥ (२)

चेटी। णं वण्णिग्रोसि ॥ (३)

विदू। (इस्तेन मुखं प्रमृज्य दृष्ट्वा। सरोषम् दण्डकाष्ठमुद्यम्य) आः दासीए धीए। राउलं क्खु, एदं। किं तव करइस्सं॥ (नायकं निर्दिश्य) भो तुह्माणं पुरदो अहं दासीए धीआए

---

(२) भवति किं त्वया कृतम्।

(३) ननु वर्णितोऽसि।

तिष्ठतोऽप्यागमनाद्दत्तेत्यर्थः सोल्लुण्ठनोक्तिरियं। भवानेव वर्ण्यते चित्रते अतः भवतः प्राधान्यमस्याकन्तु अतथाकरणादनादर इति भावः।

स्मितेति। हे मुग्धाक्षि! मुग्धे सुन्दरे अक्षिणी यस्याः सा तत् सम्बुद्धौ "मुग्धः सुन्दरमूढयो"रिति विश्वः। ते तव अधरपल्लवे अधर एव पल्लवस्तस्मिन् अयं स्मितपुष्पोद्गमः स्मितमेव पुष्पं तस्य उद्गमः उदयः दृश्यते मयेति शेषः। फलन्तु अन्यत्र तदितरस्थाने दृत्यर्थः कुत्रेत्याह पश्यतः मम चक्षुषोः भवतीति शेषः। पूर्वार्द्धे अधरस्य पल्लवेन रूपणात् स्मितस्य पुष्पेण रूपणं कृतमतः परम्परितरूपकमिति तल्लक्षणं यथा "नियतारोपणोपायः स्यादारोपः परस्य यः। तत् परम्परितं श्लिष्टे वाचके भेदभाजि वे"ति मम्मटः उत्तरार्द्धे तु अन्यत्र फलोत्पत्तिकथनादसङ्गतिः "कार्य्यकारणयोर्भिन्नदेशतायामसङ्गति" रिति विश्वनाथः। (१)

खलोकदो। ता किं मम इध ट्ठिदेण। अखदो गमिस्सं। (निष्क्रामति) ॥ (१)

चेटो। कुविदो मे अज्जअत्तेओ। जाव णं गदुअ पसा॰दइस्सं ॥ (२)

नायिका। हञ्जे चदुरिए! किं मं एआइणिं उज्झिअ गच्छसि ॥ (३)

चेटो। (नायकं निर्दिश्य सस्मितम्) एव्वं एआइणो चिरं होहि ॥ (४)

(इति निष्क्रान्ता)

नायकः। (नायिकाया मुखं पश्यन्)

दिनकरकरैस्पृष्टं विभ्रत् द्युतिं परिपाटलां

दशनकिरणैः संसर्पद्भिः स्फुटीकृतकेसरम्।

---

(१) अयि दास्याः पुत्रि! राजकुलं खल्वेतत् किं तव करिष्यामि। भो युवयोः पुरतोऽहम् दास्याः पुत्रया खलीकृतः। तत् किं ममेह स्थितेन अन्यतो गमिष्यामि।

(२) कुपितो मे आर्य्यात्रेयः यावदेनं गत्वा प्रसादयामि। *

(३) हञ्जे चतुरिके! किं मामेकाकिनीं उज्झित्वा गच्छसि।

(४) एवमेकाकिनी चिरं भव।

---

* मे मह्यं कुपितः क्रुद्धः ("क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" इति चतुर्थी)।

* दिनेति। हे मुग्धे! सुन्दरि दिनकरकरैः सूर्य्यकिरणैः स्पृष्टं स्पृष्टं अतएव परिपाटलां श्वेतलोहितां द्युतिं कान्तिं दधत् धारयत् संसर्पद्भिः बहिर्निःसरद्भिः दशनकिरणैः दन्तांशुभिः स्फुटीकृताः प्रकटीकृताः केशराः किञ्जल्काः यस्य तत् तथोक्तं "किञ्जल्कः केसरोऽस्त्रिया" मित्यमरः, ते तव इदं मुखं यदि नाम परमात्मत एव कमलेन

यदि मुखमिदं मुग्धे ! सत्यं समं कमलेन ते
मधु मधुलिहः किन्नैतस्मिन् पिबन् प्रविभाव्यते ॥ (१)

नायिका । (विहस्य मुखमन्यतो नयति) ॥

नायकः । (तदेव पठति) ॥

(प्रविश्य पटाक्षेपेण) *

चेटी । (उपसृत्य) एसो क्खु अज्जमित्तावसू कज्जेण केणवि कुमारअं पेक्खिदुमिच्छदि । (२)

नायकः । प्रिये ! गच्छ त्वमात्मनो गृहम् । अहमपि मित्रावसुं दृष्ट्वा त्वरितमागत एव ॥

नायिका । (चेट्या सह निष्क्रान्ता) ॥

(ततः प्रविशति मित्रावसुः)

मित्रा । अनिहत्य तं सपत्नं कथमिव जीमूतवाहनस्याहम् ।
कथयिष्यामि हृतं तव राज्यं रिपुणेति निर्लज्जः ॥ (३)

पद्मेन समं भवतीति शेषः, एतस्मिन् त्वन्मुखकमले इत्यर्थः मधु रसं पिबन् मधुलिहः भृङ्गः किं कथं न प्रविभाव्यते दृश्यते इत्यर्थः । अत्र हरिणीवृत्तम् तल्लक्षणं यथा "नसमरसलागैः षड्वेदैर्हयैर्हरिणीमते"ति । (१)

* पटाक्षेपेण पटस्य तिरस्करण्या आक्षेपेण आकर्षणेन । अत्र आर्त्तराजप्रवेशाभावात् पटाक्षेपः अतः तदुक्तं "पटाक्षेपो न कर्त्तव्य आर्त्तराजप्रवेशने" इति ।

एष खल्वार्य्यमित्रावसुः कार्य्येण केनापि कुमारं प्रेक्षितुमिच्छति । (२)

अनिहत्येति । तं सपत्नं शत्रुं अनिहत्य अविनाश्य अहं निर्लज्जः सन् कथमिव केन प्रकारेण जीमूतवाहनस्य समीपे इति शेषः कथयिष्यामि किमिति तव राज्यं रिपुणा शत्रुणा हृतं गृहीतमिति । अत्रापि आर्य्यावृत्तम् । (३)

अनिवेद्य च न युक्तं गन्तुमिति निवेद्य गच्छामि। कुमार मित्रावसुः प्रणमति ॥

नायकः। (मित्रावसुं दृष्ट्वा) मित्रावसो इत आस्यताम् ॥

मित्रा। (निरूप्य उपविशति) ॥

नायकः। (निरूप्य) मित्रावसो संरब्ध इव लक्ष्यसे ॥

मित्रा। कः खलु मतङ्गहतके संरम्भः ॥

नायकः। किं कृतं मतङ्गेन।

मित्रा। स्वनाशाय किल युष्मदीयं राज्यमाक्रान्तम्।

नायकः। (सहर्षमात्मगतम्) अपि नाम सत्यमेतत् स्यात् ॥

मित्रा। अत स्तदुच्छित्तये * आज्ञां दातुमर्हति कुमारः। किं बहुना

संसर्पद्भिः समन्तात् कृतसकलवियन्मध्यमानैर्विमानैः
कुर्वाणाः प्रावृषीव स्थगितरविरुचः श्यामतां वासरस्य।
एते याताश्च सद्यस्तव वचनमितः प्राप्य युद्धाय सिद्धाः
सिद्धश्चोद्वृत्तशत्रुक्षयभयविनमद्राजकं ते स्वराज्यम् ॥ (१)

---

* तदुच्छित्तये तस्य मतङ्गहतकस्य उच्छित्तये विनाशाय ("तुमर्थाच्च भाववचनादि"ति चतुर्थी)।

संसर्पद्भिरिति। समन्तात् चतुर्दिक्षु संसर्पद्भिः प्रसरद्भिः कृत...मानैः कृतं सकलानां वियन्मध्यानां आकाशप्रदेशानामित्यर्थः मानं परिमाणं यैः ते तथोक्तैः व्याप्तनभोमण्डलैरित्यर्थः विमानैः देवयानैः "विमानोऽस्त्री देवयान"मित्यमरः करणैः स्थगितरविरुचः स्थगिता तिरोहिता रवेः सूर्यस्य रुक् दीप्तिः यैः ते तथोक्ताः आवृतसूर्यकिरणा इत्यर्थः अतएव प्रावृषि वर्षासु इव "स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा" इत्यमरः; वासरस्य दिवाभागस्य श्यामतां अन्धकाराच्छन्नत्वमित्यर्थः कुर्वाणाः एते सिद्धाः सिद्धजना इत्यर्थः तव वचनं आज्ञां प्राप्य इतः अस्मात्

अथवा किं बलौघैः (२)

एकाकिनापि हि मया रभसावकृष्ट-
निस्त्रिंशदीधितिसटाभरभासुरेण।
आराद्विपत्य हरिणेव मतङ्गजेन्द्रम्।
आजौ मतङ्गहतकं हतमेव विद्धि॥ (३)

स्थानात् सद्यः अधुनैव युद्धाय समरं कर्त्तुमित्यर्थः याताः गताश्च (कार्य्यकारणयोरविलम्बसूचनार्थं क्तप्रत्ययः कृतः) ते तव खराज्यं उद्वृत्त राजकं उद्वृत्तस्य दुराचारस्य अथवा उत्क्षिप्तस्य "उद्वृत्तं स्यात् त्रिषूत्क्षिप्ते" इति मेदिनी, शत्रोः मतङ्गस्य क्षणेन सद्य अल्पकाले नेत्यर्थः भयेन अधृत्प्राप्तेनेति शेषः विनमत् वशमापद्यमानमित्यर्थः राजकं राजसमूहः यत्र तत् तथोक्तं सिद्धं भवतु द्वौ चकारावत्र कार्य्यकारणयोरविलम्बसूचनार्थमिति। अस्माकं तत्र गमनेनैव तव शत्रु सैन्यं भीतं सत् वशमापत्स्यते इत्यर्थः। अत्र खण्डराड्वसं छन्दः। (१)

बलौघैः बलानां सैन्यानामोघैः समूहैः "बलं गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययो"रिति मेदिनी। (२)

एकाकिनेति। हि यतः "हि हेताववधारणे" इत्यमरः, रभस भासुरेण रभसेन वेगेन "रभसो वेगहर्षयो"रित्यमरः, अवकृष्टस्य निष्कासितस्य निस्त्रिंशस्य खड्गस्य (निर्गतस्त्रिंशतोऽङ्गुलिभ्य इति) "खड्गे तु निस्त्रिंशचन्द्रहासासिरिष्टय" इत्यमरः, दीधितयः किरणाः सटाभरः केसरभार इव "सटा जटाकेसरयोः" "भरोऽतिशयभारयो" रिति चामरः, तेन भासुरेण दीप्तिशालिना (भास्धातोर्घुरच्) अत्यन्त दीधितय इव सटाभरः तेन भासुरेण। मया कर्त्रा एकाकिना असहायेनापि ("एकादाकिन् चासहाये" इति एकशब्दादाकिन्) हरिणा सिंहेन "यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु शुकाहि कपिभेकेषु हरि"रित्यमरः, मतङ्गजेन्द्रं करीन्द्रमिव आरात् समीपे

नायकः। (आत्मगतम् कर्णौ पिधाय) अहह दारुणमभिहितम्। अथवा एवं तावत्॥ (प्रकाशम्) मित्रावसो कियदेतत्। बहुतरमपि बाहुशालिनि त्वयि सम्भाव्यते। (१) किन्तु

स्वशरीरमपि परार्थे यः खलु दद्यादयाचितः कृपया।

राज्यस्य कृते स कथं प्राणिवधक्रौर्य्यमनुमन्ये॥ (२)

अपि च। क्लेशान् विहाय मम शत्रुबुद्धिरेव नान्यत्र।
यदि त्वमसमतप्रियं कर्त्तुं मोहसि तदनुकम्प्यतामसौ
क्लेशदासीकृतो राज्यस्य कृते राज्यस्य तपस्वी॥ (३)

“आराद् दूरसमीपयो”रित्यमरः, आरात् युद्धे निपत्य मतङ्गहतकं हतमेव विद्धि जानीहि त्वमिति शेषः। अत्र वसन्ततिलकवृत्तं “ज्ञेयं वसन्ततिलकं तभजा जगौ गः” इति। (२)

पिधाय अपिधाय आच्छाद्येत्यर्थः। एतत् भवता यदुक्तमित्यर्थः कियत् किम्परिमाणं नाधिकमित्यर्थः बाहुशालिनि बलिष्ठे इत्यर्थः त्वयि बहुतरं अतोऽधिकमपि कार्य्यमिति शेषः सम्भाव्यते त्वमेतस्मादप्यधिकदुःसहं कर्म कर्त्तुं समर्थो भवसीति भावः। (१)

स्वेति। यः अयाचितः अप्रार्थितः कृपया स्वशरीरमपि किमुतान्यादित्यपेरर्थः, परार्थे दद्यात् खलु निश्चितम्, स तादृशदयावानित्यर्थः राज्यस्य कृते निमित्तं (कृते इति निमित्तवाचकचतुर्थ्यन्तमव्ययं) कथं केन प्रकारेण प्राणिवधक्रौर्य्यं अनुमन्ये अनुमोदयामि कर्त्तुमिति शेषः। आर्य्यावृत्तम्। (२)

क्लेशान् राज्यप्रतिपालनादुत्थानित्यर्थः। विहाय त्यक्त्वा अन्यत्र अन्यस्मिन् वस्तुनि मम शत्रुबुद्धिः अयं शत्रुरिति ज्ञानं न अस्तीति शेषः, सांसारिकक्लेशा एव मे शत्रवः नान्यः इति भावः। राज्यस्य कृते क्लेशदासीकृतः क्लेशस्य दासीकृतः अतिशयक्लेशाधीनीकृत इत्यर्थः असौ राज्यस्य तपस्वी अभिलाषी इति भावः। (३)

मित्रा । (सामर्षम्) कथं नानुकम्पनीय ईदृशोऽस्माकमुपकारी कृपणश्च । (१)

नायकः । (स्वगतम्) अनिवार्य्यसंरम्भः कोपाक्षिप्तचेता न तावदयं शक्यते निवर्त्तयितुं । तदेवं तावत् । (प्रकाशम्) मित्रावसो उत्तिष्ठ । अभ्यन्तरमेव प्रविशावः । तत्रैव तावत् त्वां बोधयिष्यामि । सम्प्रति परिणतमहः ॥ (२) तथाहि

निद्रामुद्रावबन्धव्यतिकरमनिशं पद्मकोशादपास्यन्
आशापूरैककर्म्मप्रवणनिजकरप्राणिताशेषविश्वः ।
दृष्टः सिद्धैः प्रसक्तस्तुतिमुखरमुखैरस्तमप्येष गच्छन्
एकः श्लाघ्यो विवस्वान् परहितकरणायैव यस्य प्रयासः॥(३)

इति निष्क्रान्ताः सर्वे ।

द्वितीयोऽङ्कः ।

कृपणः दीनश्च । जीमूतवाहनेन तपस्वी दयालुः मित्रावसुना तपस्विपदस्य दीनार्थत्वं गृहीत्वा सोल्लुण्ठनमिदमुक्तम् । (१)

कोपाक्षिप्तचेताः कोपेन आक्षिप्तमाक्रान्तं चेतो यस्य स तथोक्तः । अहः दिवाभागः परिणतं अवसितप्रायं भवतीति शेषः । (२)

निद्रेति । अनिशं निरन्तरं निद्रा‴व्यतिकरं निद्रेव निद्रया वा मुद्रावबन्धः मुद्रितावस्था स एव व्यतिकरः व्यसनं "अथ व्यतिकरः पुंसि व्यसनव्यतिषङ्गयो"रिति मेदिनी, तं पद्मकोशात् कमलकुड्मलात् अपास्यन् निराकुर्वन्नित्यर्थः । (अत्र अनिशयन्दमहिम्ना तात्कालिकद्योतनं यद्यभवतीति शानचप्रत्यय एव युक्तः "तात्कालिकयोर्वचनशक्तिषु शानशि"ति सुधीभिर्विभाव्यम्) आशा•••विश्वः आशानां दिशां इच्छानाञ्चेति गम्यते "आशा दिग्गतितृष्णयो"रित्यमरः, पूरः पूरणं स एव एकं

चतुर्थोऽङ्कः ।

(ततः प्रविशति कञ्चुकी * रक्तोत्तरवस्त्रयुगलः प्रतीहारश्च ।)

कञ्चुकी । अन्तःपुराणां विहितव्यवस्थः
पदे पदे संस्खलितानि पश्यन् ।
जरातुरः सम्प्रति दण्डनीत्या
सर्वं नृपस्यानुकरोमि वृत्तिं ॥ (१)

अद्वितीयं कर्म तस्मिन् प्रवणैः निरतैः निजकरैः स्वकिरणैः हस्तै-रिति च गम्यते, प्राणितं जीवितं अशेषं समस्तं विश्वं जगत् "विश्वा-त्वतिविषायां स्त्री जगति स्यान्नपुंसक"मिति मेदिनी, येन स तथोक्तः, प्रसक्तस्तुतिसुखरसुखैः प्रसक्ताभिः निरन्तराभिः स्तुतिभिः सूर्योप-स्थापनादिमन्त्रैरित्यर्थः सुखराणि शब्दायमानानि सुखानि येषां ते तथोक्तैः सिद्धैः कर्तृभिः दृष्टः एव परिदृश्यमानः विवस्वान् सूर्यः अस्तं गच्छन्नपि अवसन्नोऽपीत्यर्थः एकः अद्वितीयः श्लाघ्यः प्रशस्यः कथमित्याह यस्य सूर्यस्य प्रकाशः उदयः परहितकरणाय परेषा-मालोकदानादिहितानुष्ठानार्थमेव नतु स्वार्थमिति भावः। अतः सूर्यदृष्टान्तं नास्माभिरपि परहितसाधकैर्भवितव्यमिति नायकस्याभि-प्रायः । अत्रापि स्रग्धरावृत्तम् । (२)

* कञ्चुकी कञ्चुकः परिच्छदविशेषः विद्यतेऽस्येति "कञ्चुको वारबाणे स्यान्निर्मोके कवचेऽपि चे"ति मेदिनी, कञ्चुकिलक्षणं यथा "अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः । सर्वकार्यार्थकुशलो कञ्चुकीत्यभिधीयते" इति विश्वनाथः ।

अन्तःपुराणामिति । अन्तःपुराणां शुद्धान्तस्थितानां जनानां पदे पदे (नित्यवीप्सयोरिति द्विरुक्तिः) सततमित्यर्थः संस्खलितानि स्खलनानि विच्युतिक्रमभङ्गापायोत्यर्थः, पश्यन् विहितव्यवस्थः विहिता कृता व्यवस्था सदाचारस्थापनरूपेत्यर्थः येन स तथोक्तः अहमिति शेषः

प्रती। आर्य्य वसुभद्र क नु खलु भवान् प्रस्थितः।

कञ्चुकी। आदिष्टोऽस्मि देव्या मित्रावसुजनन्या। कञ्चुकिन् दशरात्रं त्वया यावन्मलयवत्या जामातुश्च रक्तवासांसि नेतव्यानि। दुहिता च श्वशुरकुले वर्त्तते। जीमूतवाहनोऽपि युवराजेन सह समुद्रवेलां द्रष्टुमद्य गत इति श्रूयते।* तन्न जाने किं राजपुत्र्याः सकाशं गच्छामि। अथवा जामातुरिति।

प्रती। आर्य्य वरं राजपुत्र्याः सकाशं गन्तव्यं। तत्र हि कदाचिदस्यां वेलायां † जामाता स्वयमेवागतो भविष्यति।

कञ्चुकी। साधूक्तं अथ भवान् पुनः क प्रस्थितः।

प्रती। आदिष्टोऽस्मि महाराजविश्वावसुना। यथा भोः सुनन्द गच्छ मित्रावसुं ब्रूहि। अस्मिन् दीपप्रतिपदुत्सवे ‡ मलयवत्या जामातुश्च यत्किञ्चित् प्रदीयते। तदुत्सवानुरूपं किञ्चिदागत्य चिन्त्यतामिति।

सम्प्रति अधुना जरातुरः जरसा वृद्धत्वेन आतुरः कातरः सन् दण्डनीत्या दण्डग्रहणेन यष्ट्यादिकमवलम्ब्येत्यर्थः अन्यथा गमनासामर्थ्यादिति भावः। स्वपक्ष राज्ञः सर्वां इति व्यवहारमनुकरोमि राजापि दण्डनीत्या सर्वान् शास्तीत्याशयः। अत्रेन्द्रवज्रोपेन्द्रवज्रासङ्करस्वरूपोपजातिवृत्तं तल्लक्षणं यथा "स्यादिन्द्रवज्रा यदि तौ जगौ गः। उपेन्द्रवज्रा प्रथमे लघौ सा। अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः" इति। (१)

* दशरात्रं दशानां रात्रीणां समाहारः ("अहः सर्व्वैकदेशेत्यादिना" रात्रिशब्दादच्) समुद्रवेलां समुद्रस्य वेला कूलं "वेला काले च सीमायामब्धेः कूलविकारयो"रिति मेदिनी। † वेलायां काले।

‡ दीपप्रतिपदुत्सवे तत्र बलिराजः पुष्पदीपादिना पूज्यते तदुक्तं

(ततः प्रविशति जीमूतवाहनो मित्रावसुश्च) ।

नायकः । शय्या शाद्वलमासनं शुचिशिला सद्म द्रुमाणामधः
शीतं निर्झरवारि पानमशनं कन्दाः सहाया मृगाः ।
इत्यप्रार्थितलभ्यसर्वविभवे दोषोऽयमेको वने
दुष्प्रापार्थिनि यत् परार्थघटनावन्ध्यैर्वृथा स्थीयते ॥ (१)

"कार्त्तिकशुक्लपक्षमधिकृत्य बलिं प्रति भगवद्वाक्यम् । वीरप्रतिपदा नाम तव भावी महोत्सवः । अत्र त्वां नरशार्दूल हृष्टाः पुष्टाः स्वलङ्कृताः । पुष्पदीपप्रदानेन पूजयिष्यन्ति मानवाः । बलिराज नमस्तुभ्यं विरोचनसुत प्रभो । भविष्येन्द्रसुराराते पूजेयं प्रतिगृह्यता"मिति वामनपुराणे ।

शय्येति । शाद्वलं शादहरितस्थानं नवतृणपूर्णप्रदेश इत्यर्थः "शादः स्यात् कर्दमे शष्पे" इति मेदिनी "शाद्वलं शादहरिते" इत्यमरः, (नड्शादाड्ड्वलजिति शादशब्दात् ड्वलच्) शय्या, शुचिशिला शुद्धप्रस्तरखण्डं आसनं उपवेशनस्थानमित्यर्थः, द्रुमाणां वृक्षाणां अधःप्रदेश इत्यर्थः सद्म गृहं "गृहं गेहोदवसितं वेश्मसद्मनिकेतन"मित्यमरः । शीतं शीतलं निर्झरवारि निर्झरनिःसृतजलं पानं पानीयद्रव्यं, कन्दाः मूलविशेषाः अशनं भक्ष्यवस्तु, मृगाः सहायाः इति पूर्वोक्तरूपेण अप्रार्थितलभ्यसर्वविभवे अप्रार्थिता एव लभ्याः प्राप्याः सर्वे विभवाः ऐश्वर्यं यत्र तत् तथोक्ते "विभवो रै मोक्षैश्वर्ये" इति मेदिनी, दुष्प्रापार्थिनि दुष्प्रापा दुर्लभा अर्थिनो याचका यत्र तत् तथोक्ते वने अयं वक्ष्यमाणः एक दोषः असुखमित्यर्थः अस्तीति शेषः यत् परार्थघटनावन्ध्यैः परेषां याचकानामित्यर्थः अर्थः प्रयोजनं तस्य घटनायां सम्पादने वन्ध्यैः अफलैः "वन्ध्योऽफलोऽवकेशी"त्यमरः, वृथा स्थीयते अस्माभिरिति शेषः (भावे लट्) साधुप्रवृत्तेः पारार्थ्यादिति भावः । अत्रापि वृत्तं शार्दूलविक्रीडितम् । (१)

मित्रा । (अह्नमवलोक्य) कुमार त्वर्य्यतां त्वर्य्यतां समयोऽयं वेलितुमम्बुराशेः । *

नायकः । (आकर्ण्य) सम्यगुपलक्षितम्

उद्भ्रान्तजलकुञ्जरेन्द्ररभसास्फालानुबन्धोद्धतः
सर्व्वाः पर्व्वतकन्दरोदरभुवः कुर्वन् प्रतिध्वानिताः ।
उच्चैरुच्चरति ध्वनिः श्रुतिपथोन्माथी यथायन्तथा
प्रायः प्रेङ्खदसंख्यशङ्खधवला वेलेयमागच्छति ॥ (१)

मित्रा । नन्वियमागतैव । पश्य

कवलितलवङ्गपल्लवकरिमकरोद्गारसुरभिणा पयसा ।
एषा समुद्रवेला रत्नद्युतिरञ्जिता भाति ॥ (२)

---

* वेलितुं समयः उच्छ्वासकालः ("कालसमयवेलासु तुमुन्" इति समयोपपदे तुमुन्) ।

उद्भ्रान्तदिति । उद्भ्रान्त...उद्धतः उद्भ्रान्तैः जलोपरिभागे उत्क्षिप्तैः जलकुञ्जरेन्द्रैः जलहस्तिश्रेष्ठैः ये रभसेन वेगेन आस्फालाः ताडनानि तेषां अनुबन्धेन सातत्येन उद्धतः उच्छ्रितः सर्वाः पर्वतकन्दरोदरभुवः पर्वतकन्दराणां पर्वतगह्वराणां "दरीतु कन्दरो वा स्त्री देवखातबिले गुहे" इत्यमरः, उदरभुवः मध्यस्थानानि प्रतिध्वानिताः प्रतिशब्दिताः कुर्वन् श्रुतिपथोन्माथी कर्णोद्वेगकरः अयं श्रूयमाण इत्यर्थः ध्वनिः शब्दः उच्चैः यथा उच्चरति भवतीत्यर्थः तथा प्रायः मन्ये "मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः । उत्प्रेक्षा व्यज्यते शब्दैरिव शब्दोऽपि तादृशः" इति काव्यादर्शे, प्रेङ्खदसंख्यशङ्खधवला प्रेङ्खद्भिः चलद्भिः असंख्यैः बहुभिरित्यर्थः शङ्खैः जलजन्तुविशेषैः धवला शुक्ला इयं वेला आगच्छति (अत्र वेलाया आगमनासम्भवे तत्स्थजले लक्षणा मञ्चाः क्रोशन्तीत्यादिवत् ।) अत्रापि शार्दूलविक्रीडितवृत्तम् । (१)

कवलितेति । कवलित...सुरभिणा कवलितानि भक्षितानि

नायकः। मित्रावसो पश्य पश्य शरत्समयपाण्डुभिः पयोदपटलैः प्रावृताः प्रालेयाचलशिखरश्रियमुद्वहन्त्येते मलयसानवः। (१)

मित्र। नैवामी मलयसानवः। नागानामस्थिसंघाताः * खल्वमी।

नायकः। (सोद्वेगम्) कष्टम्। किं निमित्तममी सङ्घात-मृत्यवो † जाताः॥

जलक्रूपल्लवानि यैः ते तथोक्ताः ये करिणः हस्तिनः मकरा जलजन्तु-विशेषाश्च तेषां उद्गारेण निःसारणेन सुरभिणा सुगन्धिना (उद्गारि सुरभिणा इति पाठे तु उद्गिरतीति उद्गारि अतएव सुरभि तेनेति) उद्गारशब्दस्यात्र वमनार्थत्वे कृते काव्यदोषः स्यात् तदुक्तं "निष्ठ्यूतो-द्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयात्। अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगा-हते।" पयसा जलेन विशिष्टेत्यर्थः रत्नद्युतिरञ्जिता रत्नानां जल-मध्यस्थितानामिति शेषः द्युतिभिः दीप्तिभिः रञ्जिता शोभिता एषा दृश्यमानेत्यर्थः समुद्रवेला भाति शोभते। अत्रार्य्यावृत्तम्। (२)

एते मलयसानवः मलयस्य सानवः अग्रभागाः "सानुरस्त्री वने प्रस्थे वात्यामार्गाग्रकोविदे" इति मेदिनी, शरत्समयपाण्डुभिः शरत्कालेन श्वेतैः निर्जलत्वादित्यर्थः, पयोदपटलैः मेघसमूहैः प्रावृताः आच्छन्नाः प्रालेयाचलशिखरश्रियं हिमपर्वतशृङ्गशोभां उद्वहन्ति धार-यन्ति। अत्र मलयस्य हिमालयशोभाधारणासम्भवे तत्सदृशशोभाधारणे पर्यवसानान्निदर्शनालङ्कारः तदुक्तं "सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वापि कुत्रचित्। यत्र बिम्बानुबिम्बत्वं बोधयेत् सा निदर्शनेति" विश्वनाथः। (१)

* नागानां सर्पाणां अस्थिसङ्घाताः अस्थिसमूहाः।

† सङ्घातमृत्यवः सङ्घातानां समूहानां मृत्यवः मरणानि।

मित्रा । कुमार ! नैवामी सङ्घातमृत्यवः । श्रूयतां यथैतत् । इह किल सपक्षपवनापास्तसमस्तसागरजलपूरं रसातलादुद्धृत्य प्रतिदिनमेकैकं नागमाहारयति वैनतेयः ।(१)

नायकः । (सोद्वेगम्) कष्टमतिदुष्करं करोति । ततस्ततः ।

मित्रा । ततः सकलनागविनाशाशङ्किना वासुकिना * गरुत्मान् अभिहितः ।

नायकः । (सादरम्) किं मां प्रथमं भक्षयेति ।

मित्रा । नहि नहि ।

नायकः । किमन्यत् ।

मित्रा । इदमुक्तम् । त्वदभिपातसन्त्रासात् सहस्रशः स्रवन्ति भुजङ्गमानां गर्भाः । शिशवश्च पञ्चत्वमुपयान्ति । एवञ्च सन्ततिविच्छेदोऽस्माकम् । तव चैवं स्वार्थहानिः । तत् यदर्थमभिपतति भवान् नागलोकं तमिह नागमेकैकमनुदिनं प्रेषयामि । (२)

स्वपक्ष···पूरं स्वस्य पक्षयोः पवनेन *अपास्तः अपसारितः समस्तः सागरजलस्य सागरवारिणः पूरः जलसमूहः यस्मिन् तद् यथा तथा (क्रियाविशेषणमेतत्) "पूरो जलसमूहे स्या"दिति मेदिनी । आहारयति आहारं करोति (तत्करोतीत्यादिना णिच्) वैनतेयः विनतायाः अपत्यं पुमान् गरुड़ः ("स्त्रीभ्यो ढक्" इति ढक्) "गरुत्मान् गरुड़स्तार्क्ष्यो वैनतेय" इत्यमरः । (१)

* वासुकिना सर्पराजेन "वासुकिस्तु सर्पराज" इत्यमरः ।

त्वदभिपातसन्त्रासात् तव अभिपातात् भूमाववतरणात् यः सन्त्रासः भयं तस्मात् । गर्भाः स्रवन्ति गर्भेभ्यः पोता बहिर्गता भूत्वा नश्यन्तीत्यर्थः । पञ्चत्वं मृत्युं "पञ्चत्वं पञ्चानां भावे प्राणानामत्ययेऽपि चेति"

नायकः । कथं रचिता नागराजेन पन्नगाः । *

जिह्वासहस्रद्वितयस्य मध्ये
नैकापि सा तस्य किमस्ति जिह्वा ।
एकाहिरक्षार्थमहिद्विषेऽद्य
दत्तो मयात्मेति यया ब्रवीति ॥ (१)

मित्रा । प्रतिपन्नं तत्पन्नगराजेन ।

इत्थेष भोगिपतिना विहितव्यवस्थो
यान् भक्षयत्यहिपतीन् पतगाधिराजः ।
यास्यन्ति यान्ति च गताश्च दिनैर्विवृद्धिं
तेषाममी तुहिनशैलरुचोऽस्थिकूटाः ॥ (२)

मेदिनी । स्वार्थहानिः स्वार्थस्य सर्पभक्षणरूपस्य हानिः क्षतिः भक्ष्याणां नाशादिति भावः । अनुदिनं प्रतिदिनमित्यर्थः (अव्ययं विभक्तीत्यादिना अव्ययीभावसमासः) । (२)

* पन्नगाः पद्भ्यां न गच्छन्तीति । (पद्शब्दात्सुप्पूर्वाद्गम्धातोर्डः)

जिह्वेति । जिह्वासहस्रद्वितयस्य द्वयवयवं द्वितयं (संख्याया अवयवे तयपिति तयप्) सहस्रयोर्द्वितयं द्विसहस्रमित्यर्थः जिह्वानां सहस्रद्वितयं तस्य (सर्पराजस्य फणासहस्रं लोकप्रसिद्धं एकस्यामेव जिह्वाद्वयं अतः साकल्येन जिह्वासहस्रद्वयमिति ज्ञेयम्) मध्ये तस्य वासुकेरित्यर्थः एकापि सा तादृशी वक्ष्यमाणरूपेत्यर्थः जिह्वा किं नास्ति यया अस्मिन्नहनि एकाहिरक्षार्थं एकस्य नतु द्वयोरपीत्यर्थः अहेः सर्पस्य रक्षार्थं जीवनार्थं अहिद्विषे सर्पशत्रवे गरुडायेत्यर्थः मया आत्मा दत्तः इति एवं रूपं यया जिह्वयेत्यर्थः ब्रवीति स इति शेषः । उपेन्द्रवज्रावृत्तम् । (१)

इत्येति । इति पूर्वोक्तरूपेण भोगिपतिना भोगिनां सर्पाणां पतिः राजा तेन वासुकिनेत्यर्थः कर्त्रा विहितव्यवस्थः विहिता कृता

नायकः। आचर्य्यम्

सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः।

शरीरकस्यापि कृते मूढ़ाः पापानि कुर्वते॥ (१)

अहो कष्टपर्य्यवसानेयं विपत्तिर्नागानाम्। (आत्मगतम्) अपि शक्नुयामहं स्वशरीरसमर्पणेन एकस्य नागस्य प्राण-परिरक्षां कर्त्तुम्। *

(ततः प्रविशति प्रतीहारः)।

प्रती। आरूढ़ोऽस्मि गिरिशिखरम् यावत् मित्रावसु-मन्विष्यामि। (परिक्रम्य) अयं मित्रावसुर्जामातुः समीपे तिष्ठति। (उपसृत्य) विजयेतां † कुमारौ॥

व्यवस्था प्रतिदिनमेकैकसर्पभक्षणरूपेत्यर्थः यस्य सः तथोक्तः पतगाधि-राजः पतगानां पक्षिणां अधिराजः गरुड़ः यान् अहिपतीन् सर्पश्रेष्ठान् भक्षयति तुहिनशैलस्येव: तुहिनशैलस्य हिमालयगिरेः रुक् शोभा इव रुक् येषां ते तथोक्ताः तेषां गरुड़भक्षितसर्पाणामित्यर्थः अमी दृश्यमाना इत्यर्थः अस्थिकूटाः अस्थिराशयः "कूटोऽस्त्री निश्चले राशा"विति मेदिनी, दिनैः दिनेषु गच्छत्सु इत्यर्थः विवृद्धिं अतिवृद्धिं गताः प्राप्ताः यान्ति प्राप्नुवन्ति यास्यन्ति प्राप्स्यन्ति च। अत्र वसन्त-तिलकवृत्तम्। (२)

सर्वेति। सर्वाशुचिनिधानस्य सर्वेषां अशुचीनां वस्तूनामित्यर्थः निधानं स्थानं तस्य कृतघ्नस्य कृतं हन्तीति (अमनुष्यकर्तृके चेति हनधातोष्टक्।) विनाशिनः अनित्यस्येत्यर्थः शरीरकस्य कुत्सित शरीरस्य (कुत्सिते चेति कन्) कृते निमित्तं मूढ़ा मूर्खाः पापानि प्राणिवधादिरूपाणि कुर्वते आचरन्तीत्यर्थः। (१)

* कष्टपर्य्यवसाना कष्टं क्लेशकरं पर्य्यवसानं परिणामो यस्याः सा तथोक्ता। शक्नुयां समर्थो भवेयं (सम्भावनायां लिङ्)।

† विजयेतां विपराभ्यांजेरित्यात्मनेपदम्।

मित्रा । सुनन्द किं निमित्तमिहागमनम् ।

प्रती । (कर्णे कथयति) ।

मित्रा । कुमार तातो मामाह्वयति ।

नायकः । गम्यताम् ।

मित्रा । कुमारेणापि बहुप्रत्यवायेऽस्मिन् * प्रदेशे न चिरं स्थातव्यम् । (इति निष्क्रान्तः) ।

नायकः । यावदहमप्यस्माद्गिरिशिखरादवतीर्य्य समुद्रतटमवलोकयामि । (परिक्रामति) ।

नेपथ्ये । हा पुत्तअ संखचूड़ कहं वावादिअमाणो अज्ज किल तुमं मए पेक्खिदव्वो । (१)

नायकः । (आकर्ण्य) अये योषित इवार्त्तप्रलापः । केयं । कुतो वास्या भयमिति स्फुटीकरिष्ये । (परिक्रामति) । (२)

(ततः प्रविशति रुदत्या वृद्धयानुगम्यमानः शङ्खचूड़ो गोपायितवस्त्रयुगलश्च किङ्करः) ‡

---

(१) हा पुत्रक शङ्खचूड़ कथं व्यापाद्यमानोऽद्य किल त्वं मया प्रेक्षितव्यः । †

---

* बहुप्रत्यवाये बहवः प्रत्यवायाः पापानि विपद इत्यर्थः यत्र तथोक्ते ।

† पुत्रक (पुत्रशब्दात् अनुकम्पायामिति कन्) व्यापाद्यमानः विनाश्यमानः गरुड़ेनेति शेषः । किलेति निश्चये ।

योषितः स्त्रीजनस्य "स्त्री योषिदबला" इत्यमरः । (कुतः किंशब्दात् पञ्चम्यास्तसिल्) । (२)

‡ गोपायितवस्त्रयुगलः गोपायितं रक्षितं धृतमित्यर्थः वस्त्रयोः नागराजमारितवध्यचिह्नरक्तांशुकयोर्युगलं द्वयं येन स तथोक्तः ।

वृद्धा । (सास्रम्) हा पुत्तअ संखचूड़ कहं वावादिअमाणो अज्ज किल तुमं मए पेक्खिदव्वो । (चिबुकं * गृहीत्वा) इमिणा सुहअन्देण विरहिअं दाणीं अन्धआरीभविस्सदि पाआलं । (१)

शङ्ख । अम्ब किमिति वैक्लव्येन सुतरां नः पीड़यसि । ‡

वृद्धा । (निर्वर्ण्य ** पुनस्याङ्गानि स्पृशन्ती) । हा पुत्त कहं ते अदिट्ठसूरकिरणं सुउमारसरीरं णिग्घिणिओ गरुड़ो आहारइस्सदि । (कण्ठे गृहीत्वा रोदिति) । (२)

शङ्ख । अम्ब अलं परिदेवितेन § । पश्य

क्रोड़ीकरोति प्रथमं यदा जातमनित्यता ।
धात्रीव जननी पश्चात्तदा शोकस्य कः क्रमः ॥(३) (गन्तुमिच्छति)

---

(१) हा पुत्रक शङ्खचूड़ कथं व्यापाद्यमानोऽद्य किल त्वं मया प्रेक्षितव्यः । अनेन सुखचन्द्रेण विरहितमिदानीमन्धकारीभविष्यति पातालम् । †

(२) हा पुत्र कथं ते अदृष्टसूरकिरणं सुकुमारशरीरं निर्घृणो गरुड़ आहारयिष्यति । ††

---

* चिबुकं गण्डयोरधःप्रदेशं "अधस्ताच्चिबुक"मित्यमरः ।

† सुखचन्द्रेण सुखमेव चन्द्रः इति रूपकसमासः नतु सुखं चन्द्र इवेति उपमितिः अन्धकारीभविष्यतीति क्रियया चन्द्रस्यैव सुखत्वेनान्वयात् ।

‡ वैक्लव्येन कातर्य्येण । सुतरां समधिकम् ।

** निर्वर्ण्य दृष्ट्वा "निर्वर्णनन्तु निध्यानं दर्शनं लोकनेक्षण"मित्यमरः ।

†† अदृष्टसूरकिरणं अदृष्टाः सूरस्य सूर्य्यस्य किरणा येन तत् तथोक्तम् ।

§ अम्ब मातः "अम्बामाते"त्यमरः, परिदेवितेन विलापेन (नपुंसके भावे क्तः) "विलापः परिदेवन"मित्यमरः ।

क्रोड़ीति । यदा अनित्यता अस्थैर्य्यं विनाशित्वमित्यर्थः धात्री

वृद्धा। पुत्तअ चिट्ठ मुहुत्तअं जाव दे वअणं पेक्खामि। (१)

किङ्करः। एहि कुमाल संखचूड़ किं ते एदाए भणन्तीए। पुत्तसिणेहमोहिदा क्खु एसा। ण आणादि लाअकज्जं। (२)

शङ्ख। अयमागच्छामि।

किङ्करः। (आत्मगतम् अपतोऽवलोक्य।) आणीदो क्खु एसो मए वज्झसिलासमीवे। ता वज्झचिह्नं दाइस्सं। (३)

नायकः। इयमसौ योषित्। (शङ्खचूड़ं दृष्ट्वा) नूनमनेनास्याः सुतेन भवितव्यं। तत् किमाक्रन्दति। (समन्तादवलोक्य) न खल्वस्या भयकारणं किञ्चित् पश्यामि। कुतोऽस्याभयमिति। यावदुपसर्पामि। प्रसक्त एवायमेतेषामालापः। कदाचिदत एवास्याभिव्यक्तिर्भविष्यति। तद्विटपान्तरितस्तावच्छृणोमि। †

(१) पुत्र तिष्ठ मुहूर्त्तम्। यावत् ते वदनं प्रेक्षे।

(२) एहि कुमार शङ्खचूड़। किं ते एतया भणन्त्या। पुत्रस्नेहमोहिता खल्वेषा। न जानाति राजकार्य्यम्।

(३) आनीतः खल्वेष मया वध्यशिलासमीपे। तत् वध्यचिह्नं दास्यामि।*

उपमाता इव "धात्री जनन्यामलकीवसुमत्युपमातृष्वि"ति मेदिनी, जातं जन्तुं "जातं जात्योघजन्तुष्वि"त्यमरः प्रथमं जनन्या अपि प्रागित्यर्थः क्रोड़ीकरोति गृह्णाति पश्चात् तदनन्तरं जननी माता गृह्णातीति शेषः तदा अनित्यताक्रान्तत्वे सतीत्यर्थः शोकस्य कः क्रमः अवसरः अस्तीति शेषः न कश्चिदित्यर्थः। जातस्य हि ध्रुवो मृत्युरिति भावः। (१)

* वध्यशिलासमीपे वधाय हिता वध्या ("तस्मै हित"मिति यत्) शिला तस्याः समीपे। वध्यचिह्नं वध्यस्य वधार्हस्य (तदर्हतीतियत्) चिह्नम्।

† प्रसक्तः अविच्छिन्नः। अस्य भयकारणस्य अभिव्यक्तिः प्रकाशः। विटपान्तरितः विटपेन शाखया अन्तरितः व्यवहितः।

किङ्करः। (सास्रं कृताञ्जलिः) कुमाल संखचूड़! एसो सामिणो आदेसोत्ति करिअ ईदिसं णिट्ठुरं मन्तीअदि। (१)

शंख। भद्र कथय।

किङ्करः। णागलाआ वासुई आणवेदि। (२)

शंख। (शिरस्यञ्जलिं बद्धा सादरम्) किमाज्ञापयति देवः।

किङ्करः। एदं लत्तंसुअजुअलं पड़िहिअ आलुह वज्झसिलं। जेण लत्तंसुअं उवलक्खिअ गलुड़ो आहालइस्सदित्ति। (३)

नायकः। (श्रुत्वा) कथमसौ वासुकिना परित्यक्तः।

किङ्करः। कुमाल गेह्न एदं वसणजुअलं। (इत्यर्पयति) (४)

शंख। (सादरम्) उपनय। (गृहीत्वा) शिरसि स्वाम्यादेशः।

वृद्धा। (पुत्रस्य हस्ते वाससी दृष्ट्वा सोरस्ताड़म्) हा वच्छ एदं क्खु वज्जपाड़सण्णिभं सम्भावीअदि। (मोहं गता)। (५)

किङ्करः। आसण्णा गलुअस्स आअमणवेला। ता लहुं गच्छामि (इति निष्क्रान्तः)। (६)

शंख। अम्ब समाश्वसिहि।

वृद्धा। (समाश्वस्य सास्रम्) हा पुत्तक हा मणोरहसअ-

---

(१) कुमार शङ्खचूड़! एष स्वामिन आदेश इति कृत्वा ईदृशं निष्ठुरं मन्त्र्यते।

(२) नागराजो वासुकिराज्ञापयति।

(३) इदं रक्तांशुकयुगलं परिधाय आरोह वध्यशिलाम्। येन रक्तांशुकमुपलक्ष्य गरुड़ आहारयिष्यतीति।

(४) कुमार गृहाणैतद् वसनयुगलम्।

(५) हा वत्स इदं खलु वज्रपातसन्निभं सम्भाव्यते।

(६) आसन्ना गरुड़स्यागमनवेला। तल्लघु गच्छामि।

लइ कहिं पुणो तुमं पेक्खिस्सं । (कण्ठे गृह्णाति) । (१)

नायकः । अहो नैर्घृण्यं* गरुडस्य । अपि च

मूढाया मुहुरश्रुसन्ततिमुचः कृत्वा प्रलापान् बहून्
कस्त्राता तव पुत्रकेति कृपणं दिक्षु क्षिपन्त्या दृशम् ।
अङ्के मातुरवस्थितं शिशुमिमं त्यक्त्वा घृणामश्नतः
चञ्च्वग्रेण खगाधिपस्य हृदयं वज्रेण मन्ये कृतम् ॥ (२)

शंख । (आत्मनोऽश्रूणि निवारयन्) अम्ब किमतिवैक्लव्येन । ननु समाश्वसिहि ।

वृद्धा । (साश्रम्) कहं समस्ससिस्सम् । किं एक्कपुत्तकोत्ति कदुअ साणुकम्पेण णाअराएण पेसिदोसि । हा कहं

(१) हा पुत्रक हा मनोरथशतलब्ध क्व पुनस्त्वां प्रेक्षिष्ये ।

* नैर्घृण्यं निर्गता घृणा करुणा यस्य स तस्य भावः तत् ।

मूढाया इति । मूढायाः किंकर्त्तव्यविमूढाया इत्यर्थः मुहुः पुनः पुनः "मुहुः पुनः पुनः शश्वदभीक्ष्णमसकृत्समा" इत्यमरः अश्रुसन्ततिमुचः अश्रुसन्ततिं नयनजलप्रवाहमित्यर्थः मुञ्चतीति अविरतं रुदत्या इत्यर्थः हे पुत्रक दुर्भाग्य पुत्र ते तत्र कः जनः त्राता रक्षको भविष्यतीति शेषः इति एवं प्रकारेण बहून् प्रलापान् कृत्वा कृपणं कातरं यथास्यात्तथा दिक्षु समन्तादित्यर्थः रक्षकप्राप्त्याशयेति शेषः दृशं चक्षुः क्षिपन्त्याः प्रेरयन्त्याः मातुः अङ्के क्रोडे अवस्थितमिमं शिशुं बालकं घृणां दयां त्यक्त्वा निर्दयो भूत्वेत्यर्थः चञ्च्वग्रेण करणेन अश्नतः भक्षयतः (वर्त्तमानसामीप्ये वर्त्तमानवद्वा इति भविष्यति शतृप्रत्ययः कार्य्यस्याविलम्बसूचनार्थः) खगाधिपस्य खे आकाशे गच्छन्तीति खगाः पक्षिणः तेषां अधिपः राजा गरुड इत्यर्थः तस्य हृदयं वज्रेण कृतं निर्मितं मन्ये सम्भावयामि अन्यथा कथमेतादृशी निष्ठुरता । अत्रापि शार्दूलविक्रीडितवृत्तम् । (२)

अविच्छिस्से जीअलोए मम पुत्तओ सुमरिदो । सव्वधा अहं ह्मि मन्दभग्गा । (मूर्च्छति) (१)

नायकः । (सकरुणम्)

आर्त्तं कण्ठगतप्राणं परित्यक्तं स्वबन्धुभिः ।
त्राये नैनं यदि ततः कः शरीरेण मे गुणः ॥ (२)

तद्यावदुपसर्पामि ॥

शंख । अम्ब संस्तम्भयात्मानम् ।

वृद्धा । हा पुत्तअ जदा णाअलोअपरिरक्खएण वासुइणा परिच्चत्तोसि । तदा को दे अवरो परित्ताणं करिस्सदि । (३)

---

(१) कथं समाश्वसिष्यामि । किमेकपुत्रक इति कृत्वा वासुकिना नागराजेन प्रेषितोऽसि । हा कथमविच्छिन्ने जीवलोके मम पुत्रकः स्मृतः । सर्वथाहमस्मि मन्दभाग्या । *

(२) हा पुत्रक यदा नागलोकपरिरक्षकेण वासुकिना परित्यक्तोऽसि तदा कस्ते अपरः परित्राणं करिष्यति ।

---

* एकपुत्रकः त्वमेव एकमात्रः पुत्रः मे नत्वन्योऽस्तीति कृत्वा मत्वा वासुकिना अदयेन (सोल्लुण्ठोक्तिरियं) अविच्छिन्ने जीवलोके सर्वेषु एव जनेषु स्थितेषु मम पुत्रकः स्मृतः गरुड़भक्षणार्थमिति शेषः कथं अन्यो न प्रेषित इति भावः ।

आर्त्तमिति । आर्त्तं कातरं कण्ठगतप्राणं कण्ठं गताः निःसरणोन्मुखा इत्यर्थः प्राणाः यस्य तं आसन्नमृत्युमित्यर्थः स्वबन्धुभिः स्वात्मीयवर्गैः परित्यक्तं एनं बालकमित्यर्थः यदि न त्राये रक्षामि ततः मे मम शरीरेण को गुणः (अत्रापि साधनक्रियापेक्षया करणत्वात् तृतीया) कोऽपि गुणो नास्तीत्यर्थः । (२)

नायकः । (उपसृत्य) नन्वहमहम् । *

वृद्धा । (नायकं दृष्ट्वा ससम्भ्रममुत्तरीयेण मुखकमाच्छाद्य नायकमुपसृत्य जानुभ्यां स्थित्वा) विणदाणन्दण वावादेहि मं । अहं दे णाअराइणा आहारणिमित्तं परिकप्पिदा । (१)

नायकः । (सास्रम्) अहो पुत्रवात्सल्यम् ॥

अस्या विलोक्य मन्ये पुत्रस्नेहेन विक्लवत्वमिदम् ।
अकरुणहृदयः करुणां करिष्यति भुजङ्गशत्रुरपि ॥ (२)

शंख । अम्ब अलं त्रासेन । न नागशत्रुः । पश्य

महाहिमस्तिष्कविभेदमुक्त
रक्तच्छटाचर्चितचण्डचञ्चुः ।

---

(१) विनतानन्दन व्यापादय माम् । अहं ते नागराजेनाहारनिमित्तं परिकल्पिता । ‡

---

* अहमहं परित्राणं करिष्यामीति शेषः ।

† शङ्खचूड़माता तु नायकं गरुड़ं मन्यमाना कथयति विनतेति । विनतानन्दन विनतापुत्र गरुड़ मां व्यापादय नाशय त्वमिति शेषः ।

अस्या इति । अस्याः शङ्खचूड़जनन्याः पुत्रस्नेहेन हेतुना इदं ईदृशं विक्लवत्वं कातरत्वं विलोक्य दृष्ट्वा अकरुणहृदयः अकरुणं निर्दयं हृदयं मनो यस्य स तथोक्तः भुजङ्गशत्रुः सर्पशत्रुः गरुड़ोऽपि करुणां दयां करिष्यति शङ्खचूड़भक्षणात् विरतो भविष्यतीति भावः मन्ये सम्भावयामि । (२)

महेति । महाहि···चञ्चुः महतां दृहतां अहीनां सर्पाणां ये मस्तिष्काः तेषां विभेदात् विदारणात् मुक्ता चरिता या रक्तच्छटा रक्तप्रवाहः तया चर्च्चिते रञ्जिते चण्डे प्रखरे चञ्चू यस्य स तथोक्तः असौ गरुत्मान् गरुड़ः क कुत्र वर्त्तत इति शेषः सौम्य···आकृतिः स्वभावः शीलञ्च रूपं कान्तिश्च आकृतिर्मूर्त्तिश्च ताः, सौम्याः शोभनाः ता यस्य स तथोक्तः । (अत्र स्वभावशब्दस्य बहुत्वेऽपि पूर्वनिपातः कृतः ‘‘अल्पषहेत्वोः

कासौ गरुत्मान् क च नाम सौम्य
स्वभावरूपाकृतिरेष साधुः ॥ (१)

वृद्धा। अहं क्खु तुज्झ मरणभीआ सव्वं एव्व लोअं गरुअमअं पेक्खामि। (२)

नायकः। अम्ब किं पुनः पुनरभिहितेन। ननु कर्मणैव सम्पादयामि। (३)

वृद्धा। (शिरस्यञ्जलिं बद्ध्वा) पुत्तअ चिरं जीअ ॥ (४)

नायकः। ममैतदम्बार्पय वध्यचिह्नं
प्रावृत्य यावद्विनतात्मजाय।
पुत्रस्य ते जीवितरक्षणाय

---

(२) अहं खलु तव मरणभीता सर्वमेव लोकं गरुडमयं प्रेक्षे। *

(४) पुत्रक चिरञ्जीव।

क्रियायाः" इत्यनेन स्वकृतैव पूर्वनिपातशास्त्रस्य व्यभिचारज्ञापनादिति) एव उपस्थित इत्यर्थः साधुः (साध्नोति परकृतमिति साधेः कर्त्तरि उः) सज्जनः "साधुर्वार्द्धुषिके चारौ सज्जने चापि वाच्यवत्" इति विश्वः, क च नाम सज्जनस्त्वनायां अनयोः महान् भेदोऽस्तीति भावः द्वौ ककारौ महदन्तरं सूचयतः। अत्रोपजातिवृत्तं लक्षणमुक्तं प्राक्। (१)

* गरुडमयं गरुडादपृथग्भूतं (अपृथग्भूते चेति मयट्)

अभिहितेन कथनेन किं किमपि साध्यत्वाभावोऽत्यर्थः कर्मणा आचरणेनैव सम्पादयामि। (cf. "शरदि गर्जति न वर्षति वर्षति वर्षासु निःस्वनो मेघः। नीचो वदति न कुरुते न वदति कुरुते हि सज्जन" इति)। (३)

ममेति। हे अम्ब मातः एतत् वध्यचिह्नं रक्तांशुकयुगलमित्यर्थः मम मह्यमित्यर्थः (विवक्षायां षष्ठी) अर्पय देहि त्वमिति शेषः। यावत् साकल्येन प्रावृत्य आच्छाद्य देहमिति शेषः विनतात्मजाय गरुडाय ते

स्वदेहमाहारयितुं ददामि । (१)

वृद्धा । (कर्णौ पिधाय) पडिहदं क्खु एदम् । तुमम्पि सङ्खचूडणिव्विसेसो पुत्तो । अहवा सङ्खचूडादोवि अहिअअरो जो एव्वं बन्धुजणपरिच्चत्तं वि पुत्तकं मे सरीरप्पदाणेण रक्खिदुमिच्छसि । (२)

शंख । अहो जगद्विपरीतमस्य महासत्त्वस्य† चेतः । कुतः
विश्वामित्रः श्वमांसं श्वपच इव पुराभक्षयद्यन्निमित्तं
नाडीजङ्घो निजघ्ने कृततदुपकृतिर्यत्कृते गौतमेन ।

---

(२) प्रतिहतं * खल्वेतत् । त्वमपि शङ्खचूडनिर्विशेषः पुत्रः । अथवा शङ्खचूडादप्यधिकतरम् । य एवं बन्धुजनपरित्यक्तमपि पुत्रकं मे शरीरप्रदानेन रक्षितुमिच्छसि ।

तव पुत्रस्य शङ्खचूडस्य जीवितरक्षणाय प्राणरक्षार्थं स्वदेहं आत्मशरीरं आहारयितुं खादयितुं ददामि अहमिति शेषः । अत्राप्युपजातिवृत्तम् ।(१)

* प्रतिहतं निवारितमित्यर्थः भवत्विति शेषः ।

† महासत्त्वस्य महत् उदारं सत्त्वं स्वभावो यस्य तथोक्तस्य "सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयो"रिति मेदिनी, चेतः चित्तं जगद्विपरीतं अन्यादृशमित्यर्थः ।

कथमित्युच्यते इत्याह विश्वामित्र इति । पुरा पूर्वकाले विश्वामित्रः तदाख्यः मुनिः (विश्वस्य मित्रमिति "मित्रे चर्षौ" विति दीर्घत्वं) श्वपचः चण्डाल इव "चण्डालप्लवमातङ्गदिवाकीर्त्ति-जनङ्गमाः । निषाद श्वपचा"वित्यमरः, यन्निमित्तं श्वमांसं शुनः कुक्कुरस्य मांसं "कौलेयकः सारमेयः कुक्कुरो मृगदंशकः । शुनको भषकः श्वा स्या"दित्यमरः, अभक्षत् भक्षितवान् । गौतमेन कर्त्रा कृततदुपकृतिः कृता तस्य गौतमस्य उपकृतिः धनदानादिरूपोपकारो येन स तथोक्तः नाडीजङ्घः तदाख्यः राजधर्मेत्यपरनामको बकः यत्कृते

पुत्रोऽयं कश्यपस्य प्रतिदिनमुरगानत्ति तार्क्ष्यो यदर्थं
प्राणांस्तानेव साधुस्तृणमिव कृपया यः परार्थं ददाति॥ (१)

निजाङ्गे निहतः अयं कश्यपस्य देवपितुः पुत्रः तार्क्ष्यः गरुडः (गरुडा-पातस्यापि तस्य सूचनार्थमयमिति निर्देशः) प्रतिदिनं प्रत्यहं यदर्थं उरगान् सर्पान् (उरसा गच्छन्तीति उरः शब्दात् गम्धातोः खप्रत्ययेन निपातनात् सिद्धं) अत्ति भक्षयति य एष साधुः तान् तादृशान् प्राणावरणादिनापि रक्ष्यानित्यर्थः, प्राणान् असून् "पुंसि भूम्न्यसवः प्राणाः" इत्यमरः, तृणमिव अतिलघुपदार्थमिवेत्यर्थः कृपया परार्थं परोप-काराय ददाति त्यजतीत्यर्थः। अत्र स्रग्धरावृत्तम्। विश्वामित्रस्य श्वमांस-भक्षणं यथा—कदाचिदनावृष्ट्यां दुर्भिक्षे जाते विश्वामित्रः वस्तुनराज्ञाभावात् त्रिरात्रमुपोष्य क्षुधार्तः सन् चण्डालहस्तात् कुक्कुरमांसं भक्षयामास तदुक्तं मनुना "क्षुधार्तश्चात्तुमभ्यागात् विश्वामित्रः श्वजाघनीम्। चाण्डाल-हस्तादादाय धर्माधर्मविचक्षणः" इति दशमेऽध्याये। नाडीजङ्घवधविवरणं—पुरा किल गौतमो नाम कश्चित् ब्राह्मणः भिक्षार्थं पर्यटन् ब्राह्मणवर्जि-तमतिसमृद्धं कञ्चित् देशं जगाम। तत्र वसन्तं धनशालिनं शक्ति-परायणं कञ्चित् दस्युं वत्सरभोज्यं भक्ष्यं ययाचे। दस्युश्च याचितः तस्मै भक्ष्यादिकं दत्तवान्। ब्राह्मणश्च तत्र स्थित्वा वाणिज्यादिकं कृत्वा वन्यान् हंसान् विनाशयितुमारेभे। क्रमेण च दस्युसंसर्गेण अतिनिर्दयो जातः। एकदा कश्चित् स्वाध्यायनिरतः ब्रह्मचारी तद्गृहमागत्य स्कन्धार्पितहंसभारमागच्छन्तं तं दृष्ट्वा भृशन्निरचकार अनाहारेणैव च रजनीमतिवाह्य प्रातर्यथेष्टं ययौ। गौतमश्च प्रातरुत्थाय समुद्रा-भिमुखं ययौ। गच्छंश्च पथि समुद्रगामिना वणिक्सार्थेन मिलित्वा सानन्दोऽभूत्। अथ गिरिगह्वरं प्रविष्टे तस्मिन् वणिक्सार्थे कश्चित् मदकलो हस्ती निर्गत्य सर्वान् व्यापादयितुमारेभे। गौतमस्तु तद्दर्शनात् भीतभीतं उत्तरामुखं प्रस्थितः। पुनश्च रम्यकाननादुद्यानोद्यानान्तरं बभ्राम। कस्यचिद्वटस्याधः आसीनो गतक्लमोऽभूत्। प्राप्तायां सन्ध्यायां राजधर्म-परनामा नाडीजङ्घो बकस्तत्राजगाम। ब्राह्मणं दृष्ट्वा स्वागतप्रश्नादिना

सम्बद्धं तत्रावस्थानाय प्रार्थितवान्। गौतमश्च तत्र स्थित्वा आगमनप्रयोजनं पृष्टः धनलाभेच्छां प्रकाशयामास। बकस्तु विरूपाक्षनामानं राक्षसाधिपतिं दातृत्वेन निर्दिश्य तं प्रेषितवान्। गौतमस्तत्र बहुधनादिकं लब्ध्वा बकसमीपं पुनराजगाम, विश्वस्तनिद्रितं तं बकं निहत्य तन्मांसं पथि भक्षणार्थं गृहीत्वा सर्वं धनादिकञ्च प्रतस्थे इति पौराणिकी कथा। तदुक्तं महाभारते शान्तिपर्वणि आपद्धर्माध्याये :—

"स तान्यतिमनोज्ञानि विहङ्गानां रुतानि वै।
शृण्वन् सुरमणीयानि विप्रोऽगच्छत् स गौतमः॥
ततोऽपश्यत् सुरम्ये वै सुवर्णसिकताचिते।...
श्रिया युक्तं महावृक्षं न्यग्रोधं सुमण्डलम्॥
तमासाद्य तदा युक्तस्तस्याधस्तादुपाविशत्।...
ततोऽस्तं भास्करे याते सन्ध्याकाल उपस्थिते।
आजगाम स्वभवनं ब्रह्मलोकात् खगोत्तमः।
नाडीजङ्घ इति ख्यातो दयितो ब्रह्मणः सखा॥
बकराजो महाप्राज्ञः कश्यपस्यात्मसम्भवः।
राजधर्मेति विख्यातो बभूवाप्रतिमो भुवि॥...
समागतं खगं दृष्ट्वा गौतमो विस्मितोऽभवत्।
क्षुत्पिपासापरिश्रान्तो हिंसार्थी चाभ्यवेक्षत॥
...यथोपविष्टं शयने गौतमं धर्मराट् तदा।
पप्रच्छ काश्यपो वाग्मी किमागमनकारणम्॥
ततोऽब्रवीत् गौतमस्तं दरिद्रोऽहं महामते।
...ततः स पथि भोक्तव्यं प्रेक्षमाणो न किञ्चन॥
कृतघ्नः पुरुषव्याघ्र मनसेदमचिन्तयत्।
अयं बकपतिः पार्श्वे मांसराशिः स्थितो महान्॥
इमं हत्वा गृहीत्वा च यास्येऽहं समभिद्रुतम्।
...कृतघ्नस्तु स दुष्टात्मा तं जिघांसु रथाप्यतः॥
ततोऽलातेन दीप्तेन विश्वस्तं निजघान तम्।
...तं गृहीत्वा सुवर्णञ्च ययौ द्रुततरं द्विजः"॥ १॥

(नायकमुद्दिश्य) भो महासत्त्व त्वया दर्शिता एव आत्मप्रदानव्यवसायनिर्व्याजा मयि कृपालुता *। तदलमनेन निर्बन्धेन। पश्य

जायन्ते च म्रियन्ते च मद्विधाः क्षुद्रजन्तवः।
परार्थे बद्धकक्षाणां त्वादृशामुद्भवः कुतः॥ (१)

तत् किमनेन निर्बन्धेन। मुच्यतामयमध्यवसायः॥

नायकः। शङ्खचूड न मे चिरालब्धावसरस्य अस्य परार्थसम्पादनामनोरथस्यान्तरायं कर्त्तुमर्हसि। तदलं विकल्पेन दीयतामेतत् वध्यचिह्नम्। †

---

* आत्मप्रदानव्यवसायनिर्व्याजा निर्नास्ति व्याजः कपटं यस्यां सा आत्मनः प्रदाने गरुडस्य भक्षणनिमित्तमिति शेषः यो व्यवसायः दृढ़ानुबन्धः तेन निर्व्याजा कृपालुता कृपालोः सदयस्य भावः (त्वतलौ गुणवाचिन इति तल् "तलन्तं येनिकम्बला" इत्यादिना स्त्रीत्वम्)।

जायन्ते इति। मद्विधा मादृशाः क्षुद्रजन्तवः अकिञ्चित्करप्राणिनः जायन्ते उत्पद्यन्ते च म्रियन्ते विनाशं प्राप्नुवन्ति च तेषामुत्पत्तौ विनाशे वा जगतः कोऽप्युपकारोऽपकारो वा नास्तीति भावः। परार्थे परहितसाधनार्थं बद्धकक्षाणां बद्धः वस्त्रादिनेति शेषः कक्षः बाहुमूलं यैः ते तथोक्तानां "कक्षाऽऽच्छादनतरीयस्य पश्चादञ्चलपल्लवे। स्याद्दोर्मूले ना दोर्मूले" इति मेदिनी, अत्यायासपरतामिश्रार्थः त्वादृशां त्वमिव दृश्यन्ते ये ते तथोक्तानां (युष्मच्छब्दात् दृशेः क्विप्) उद्भवः उत्पत्तिः कुतः कथं भवतीति शेषः अतिविरल इत्यर्थः। (cf. "भवोऽपि लोकाभ्युदयाय तादृशा"मिति कालिदासः)। (१)

† लब्धावसरस्य लब्धः प्राप्तः अवसरः सम्पादनकालो यस्य स तथोक्तस्य। परार्थसम्पादनमनोरथस्य परहितानुष्ठानाभिलाषस्य। अन्तरायं विघ्नं। विकल्पेन संशयेन।

शंख। भो महासत्त्व किमनेन वृथायासेन। न खलु शङ्खधवलं शङ्खपालकुलं * शङ्खचूड़ो मलिनीकरिष्यति। यदि ते वयं अनुकम्पनीयाः तदा इयमस्मद्विपत्तिविक्लवा न यथा जीवितं जह्यात् तथाभ्युपायश्चिन्त्यताम्॥

नायकः। किमत्र चिन्त्यते

म्रियते म्रियमाणे या त्वयि जीवति जीवति।
तां यदीच्छसि जीवन्तीं रक्षात्मानं ममासुभिः॥ (१)

अयमभ्युपायः †। तदर्पय त्वरितं वध्यचिह्नम्। यावदनेनात्मानं प्रच्छाद्य वध्यशिलामारोहामि। त्वमपि जननीं पुरस्कृत्य आत्मादेशान्निवर्त्तस्व। कदाचिदस्या आलोक्य घातस्थानं सन्निकृष्टं स्त्रीस्वभावकातरत्वेन ‡ जीवितं जह्यात्। किं न पश्यति भवानिदं विपन्नपन्नगानेककङ्कालसंकुलं महाश्मशानं **। तथाहि

---

* शङ्खधवलं शङ्खवत् धवलं निर्मलमित्यर्थः। शङ्खपालकुलमिति स्वकुलनाम।

म्रियत इति। या तव मातेति शेषः त्वयि म्रियमाणे विनश्यति सति ("यस्य च भावेन भावलक्षण"मिति सप्तमी) म्रियते, जीवति त्वयीति शेषः जीवति येति शेषः, तां त्वज्जननीमित्यर्थः यदि जीवन्तीमिच्छसि त्वमिति शेषः तदा मम असुभिः प्राणैः आत्मानं स्वजीवनमित्यर्थः रक्ष त्वमिति शेषः (प्रार्थनायां लोट्)। (१)

† अयं अभ्युपायः तव मातुर्जीवनरक्षाया इति शेषः। ‡ स्त्रीस्वभावकातरत्वेन स्त्रीणामबलानां यत् स्वभावस्य प्रकृतेः कातरत्वं वैक्लव्यं तेन। ** विपन्न··· संकुलं विपन्नानां मृतानां पन्नगानां सर्पाणां ये अनेके बहवः कङ्कालाः अस्थिसमूहास्तैः "स्यात्शरीरास्थि कङ्काल"इत्यमरः सङ्कुलं व्याप्तं। महाश्मशानं महत् श्मशानं "श्मशब्देन शवः प्रोक्तः शानं तत्स्थानमुच्यते" इति।

चञ्चच्चञ्चूत्कृत्तच्युतपिशितलवग्राससंवृद्धगर्द्धै-
र्गृध्रैरावद्धपक्षद्वितयविधुतिभिर्बद्धसान्द्रान्धकारे ।
वक्त्रोद्वान्ताः पतन्त्यः शमितशिखिशिखाः श्रेणयोऽस्मिन् शिवानां
अस्रस्रोतस्यजस्रस्रुतिबहलवसावासविस्रे स्वनन्ति ॥ (१)

अपि च । कथं न पश्यामि

प्रतिदिनमहिनाहारेण हि विनायकाह्वितप्रीति ।
शशिधवलास्थिकपालं वपुरिव रौद्रं श्मशानमिदम् ॥ (२)

चञ्चदिति । चञ्चत्...गर्द्धैः चञ्चद्भिः चलद्भिः (चञ्चु गमने इति धातोः शतरि रूपं) चञ्चूनां अग्रैः कृत्ताः खण्डिताः अतएव च्युता भूपतिता ये पिशितानां मांसानां लवाः खण्डाः तेषां ग्रासे भक्षणविषये इत्यर्थः संवृद्धः गर्द्धः आग्रहो येषां तैः गृध्रैः मांसादपक्षिविशेषैः (शकुनीति प्रसिद्धैः) "दाक्षाय्यगृध्रौ" इत्यमरः कर्त्तृभिः आबद्ध... विधुतिभिः आबद्धाभिः कृताभिः पक्षद्वितयानां पक्षद्वयानां विधुतिभिः कम्पनैः करणैः बद्धसान्द्रान्धकारे बद्धः कृतः सान्द्रः गाढः अन्धकारः यत्र अजस्र...विस्रे अजस्रस्रुतयः नियतक्षरणाः या बहलाः राशीभूताः वसाः मेदांसि "मेदस्तु वपा वसा" इत्यमरः, तासां वासैः गन्धैः विस्रे आमगन्धिनि "विस्रं स्यादामगन्धि यत्" इत्यमरः । मिश्रे इति वा पाठः । अस्मिन् अस्रस्रोतसि रक्तप्रवाहे "अस्रः कोणे कचे पुंसि क्लीबमश्रुणि शोणिते" इति मेदिनी, पतन्त्यः अतएव शमित...शिखाः शमिता निर्वापिता शिखिनामग्नीनां मुखनिःसृतानामित्यर्थः शिखा ज्वाला याभिः ताः वक्त्रोद्वान्ताः वक्त्रेभ्यः मुखेभ्यः उद्वान्तं अग्निनिःसरणं यासां ताः शिवानां शृगालानां "स्त्रियां शिवाभूरिमायगोमायुमृगधूर्त्तकाः । शृगाले" इत्यमरः, श्रेणयः समूहा इत्यर्थः स्वनन्ति शब्दायन्ते । अत्र स्रग्धरावृत्तम् । (१)

प्रतीति । हि यतः प्रतिदिनं प्रत्यहं अहिना सर्पेण आहारेण भक्ष्येण अन्यत्र अहिना सर्पेण हारेण गजदन्तेनेति शेषः विनायकाह्वितप्रीति

(दिशोऽवलोक्य) यथायं चलितमलयाचलशिलासञ्चयः प्रचण्डो नभस्वान् * तथा तर्कयामि आसन्नीभूतः खलु पक्षिराज इति । तथाहि

तुल्याः सम्वर्त्तकाभ्रैः पिदधति गगणं पंक्तयः पक्षतीनां
तीरे वेगानिलोऽम्भः क्षिपति भुव इव प्लावनायाम्बुराशेः ।
कुर्व्वन् कल्पान्तशङ्कां सपदि च सभयं वीक्षितो दिग्द्विपेन्द्रैः
देहोद्योत्वैद्वंशाशाः कपिशयति मुहुर्द्वादशादित्यदीप्तिः ॥ (१)

परार्थे देहं शरीरमुज्झतः त्यजतः ममेति शेषः महतीं सातिशयां प्रीतिमानन्दमाधत्ते ददातीत्यर्थः । (१)

* चलित ... सञ्चयः चलितः (चलान्तर्भूतणयर्थः) मलयाचलस्य मलयपर्वतस्य शिलासञ्चयः पाषाणसमूहो येन स तथोक्तः । नभस्वान् वायुः ।

तुल्या इति । सम्वर्त्तकाभ्रैः मेघनायकविशेषैः "क्षियुते शाकवर्षे तु चतुर्भिः शेषिते क्रमात् । आवर्त्तं विद्धि संवर्त्तं पुष्करं द्रोणमम्बुद । आवर्त्तो निर्जलो मेघः संवर्त्तश्च बहूदकः । पुष्करो दुष्करजलो द्रोणः शस्यप्रपूरक" इति ज्योतिस्तत्त्वम् । तुल्याः अतिप्रशस्ता इत्यर्थः । पक्षतीनां पक्षमूलानां "पक्षतिस्तु भवेत् पक्षमूले च प्रतिपत्तिथा" वित्यमरः, पंक्तयः श्रेणयः गगणं पिदधति आच्छादयति, वेगानिलः वेगोत्पन्नवायुः भुवः पृथिव्याः प्लावनाय भुवं प्लावयितुमित्यर्थः इव अम्बुराशेः समुद्रस्य अम्भः जलं तीरे क्षिपति अतएव सपदि झटात् कल्पान्तशङ्कां प्रलयकालाशंकां "सम्वर्त्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपी"त्यमरः, कुर्वन् जनयन्नित्यर्थः दिग्द्विपेन्द्रैः दिग्गजेन्द्रैः कर्त्तृभिः सभयं यथास्यात्तथा वीक्षितो दृष्टः द्वादशादित्यदीप्तिः द्वादशानामादित्यानां प्रलयोदितानामित्यर्थः दीप्तिरिव दीप्तिर्यस्य सः । "इन्द्रो धाता च पर्जन्यस्त्वष्टा पूषार्य्यमा भगः । विवस्वान् विष्णुरंशश्च वरुणो मित्र एव च । एते द्वादश विख्याता आदित्या लोकपूजिता" इति

तद् यावदसौ नागच्छेत् शङ्खचूडः तावत् त्वरिततरमिमां वध्यशिलामारोहामि। (तथा कृत्वा उपविश्य स्पर्शं नाटयति)

अहो स्पर्शोऽस्याः।

नो तथा सुखयति मनो मलयवतो मलयचन्दनरसार्द्रा।
अभिवाञ्छितार्थसिद्धेर वध्यशिलेयं यथाश्लिष्टा॥ (२)

अथवा किं मलयवत्या।

शयितेन मातुरङ्के विस्रब्धं शैशवे न तत् प्राप्तम्।
लब्धं सुखं मयास्यां वध्यशिलायां यदुत्सङ्गे॥ (३)

महाभारते। गरुड़ इति शेषः देहोद्योतैः देहस्य शरीरस्य उद्योतैः ज्योतिषा दशाशाः दशदिशः सद्यः कपिशयति कपिशा धूम्राः "श्यावः स्यात् कपिशो धूम्रधूमलौ कृष्णलोहिते"त्यमरः (कपिशशब्दात् "तत्करोती" त्यादिना णिच् ततो लट्) प्रलयकाले सम्वर्त्तकादीनामुदयो भवति यथा "ततः सम्वर्त्तकः शैलानतिक्रम्य महांस्तथा। लोकान् दहति दीप्तात्मा रुद्रतेजोविजृम्भितः। सप्तरश्मिरथो भूत्वा समुत्तिष्ठन् दिवाकरः। असह्यरश्मिर्भवति पिबन्नम्भो गभस्तिभि"रित्यादि कूर्मपुराणे। अत्र स्रग्धरावृत्तम्। (१)

नो इति। मलयचन्दनरसार्द्रा मलयचन्दनरसेन आर्द्रा लिप्ता मलयवती कर्त्री तथा तादृशं मनः कर्म ममेति शेषः नो न "अभावे नह्यनोनापी"त्यमरः, सुखयति आनन्दयति अभिवाञ्छितार्थसिद्धेर अभिवाञ्छितस्य अभिलषितस्य अर्थस्य प्रयोजनस्य शङ्खचूड़जीवनरक्षारूपस्येत्यर्थः सिद्धेर सफलत्वाय आश्लिष्टा आलिङ्गिता (स्वरन्तरध्वनिः) आरूढ़ा इत्यर्थः इयं वध्यशिला यथा यादृशं सुखयतीति शेषः। आर्य्यावृत्तम्। (२)

शयितेनेति। शैशवे मातुः अङ्के क्रोड़े विस्रब्धं विस्रम्भं निर्भयमित्यर्थः शयितेन कृतशयनेन मया तत्सुखमिति शेषः न प्राप्तं अस्या

तदयमागतो गरुत्मान् । यावदात्मानमाच्छादयामि ।
(तथा करोति) ।

(ततः प्रविशति गरुडः ।)

गरुडः । दृष्ट्वा विम्बं हिमांशोर्भयकृतवलयां संस्मरन् शेषमूर्त्तिं
सानन्दं स्यन्दनाश्वत्रसनविचलिते पूष्णि दृष्टोऽग्रजेन ।
एष प्राप्तावसज्जज्जलधरपटलैरायतीभूतपक्षः
प्राप्तो वेलामहीध्रं मलयमहमहिग्रासगृध्नुः क्षणेन ।(१)

वध्यशिलाया उत्सङ्गे क्रोडे यत् सुखं लब्धं प्राप्तमनुभूतमित्यर्थः । आर्य्यावृत्तम् । (२)

दृष्ट्वेति । हिमांशोः चन्द्रस्य विम्बं मण्डलं दृष्ट्वा भयकृतवलयां भयेन मद्दर्शनोत्पन्नेनेति शेषः कृतं वलयं मण्डलाकारावस्थानं यया सा तथोक्तां शेषमूर्त्तिं शेषस्य अनन्तस्य "शेषोऽनन्त" इत्यमरः, मूर्त्तिं तनुं "स्त्रियां मूर्त्तिस्तनुस्तनू"रित्यमरः, संस्मरन् (cf. "नायं शशी कुण्डलितः फणीन्द्र" इत्यादि) पूष्णि सूर्य्ये स्यन्दन...विचलिते स्यन्दनस्य रथस्य अश्वानां त्रसनेन त्रासेन मद्दर्शनोत्पन्नेनेत्यर्थः विचलिते सति सानन्दं यथा स्यात्तथा अग्रजेन सूर्य्यसारथिना दृष्टः "सूरसूतोऽरुणोऽनूरुः काश्यपि र्गरुडाग्रज" इत्यमरः, अहिग्रासगृध्नुः अहीनां सर्पाणां ग्रासे गृध्नुः लोलुपः ("त्रसि गृधि धृषि क्षिपेः क्नु"रिति गृधेः क्नुः) एषः अहं क्षणेन शीघ्रमित्यर्थः (प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया) प्राप्त... जलधरपटलैः प्राप्तैः पक्षद्वयमध्यमिति शेषः अवसज्जतां अन्तर्गतां जलधराणां मेघानां पटलैः समूहैः करणैः आयतीभूतपक्षः विस्तृतपक्षः सन् वेलामहीध्रं वेलायां समुद्रकूले यः महीध्रः पर्वतः तं "महीध्रे शिखरिक्ष्माभृदहार्य्यधरपर्वताः" इत्यमरः, मलयं प्राप्तः आगत इत्यर्थः । प्रथमे चरणे स्मरणालङ्कारः तदुक्तं "सदृशानुभवाद्वस्तुस्मृतिः स्मरणमुच्यते" इति विश्वनाथः । स्रग्धरावृत्तम् । (१)

नायकः। (सपरितोषम्)

संरक्षता पन्नगमद्य पुण्यं
मयार्जितं यत् स्वशरीरदानात्।
भवे भवे तेन ममैव भूयात्
परार्थहेतोः खलु देहलाभः॥ (१)

गरुडः। (नायकं निर्वर्ण्य)

अस्मिन् वध्यशिलातले निपतितं शेषानहीन् रक्षितुम्
निर्भिद्याशनिचण्डचण्डतरया चञ्च्वाधुना वक्षसि।
भोक्तुं भोगिनमुद्धरामि तरसा रक्ताम्बरप्रावृतम्
दिग्धं मद्भयदीर्यमाणहृदयप्रस्यन्दिनेवासृजा॥ (२)

(इत्यभिपत्य नायकं गृह्णाति। नेपथ्ये पुष्पाणि पतन्ति। दुन्दुभयश्च स्वनन्ति)।

संरक्षतेति। अद्य पन्नगं सर्पं संरक्षता मया कर्त्रा स्वशरीरदानात् यत् पुण्यं अर्जितं संगृहीतं तेन पुण्येनेति शेषः भवे भवे प्रतिजन्मेत्यर्थः ("नित्यवीप्सयो"रिति वीप्सार्थे द्विरुक्तिः) ममैव परार्थहेतोः परहितार्थं देहलाभः शरीरप्राप्तिः जन्मेत्यर्थः भूयात् खलु। उपजाति वृत्तम्। (१)

अस्मिन्निति। शेषान् अवशिष्टान् अहीन् सर्पान् रक्षितुं अस्मिन् वध्यशिलातले निपतितं रक्ताम्बरप्रावृतं लोहितवस्त्राच्छादितं मत्··· प्रस्यन्दिना मत् भयं तेन दीर्यमाणात् स्फुटतः हृदयात् प्रस्यन्दते क्षरतीति, तथोक्तेन असृजा रक्तेन दिग्धं लिप्तमिव भोगिनं अधुना अशनिवच्चण्डतरया वज्रवत् दारुणया चञ्च्वा वक्षसि (अवच्छेदे सप्तमी) निर्भिद्य विदार्य भोक्तुं (क्रियार्थायां क्रियायां तुमुन्) तरसा वेगेन "रंहस्तरसी तु रयः स्यद" इत्यमरः उद्धरामि उद्धृत्य गृह्णामि अहमिति शेषः। अत्र शार्दूलविक्रीडितवृत्तम्। (२)

कुतूहली निष्क्रान्तश्चिरयतीति दुःखमास्ते महाराजविश्वावसुः। समादिष्टश्चास्मि तेन, यथा सुनन्द श्रुतं मया सन्निहितगरुड़प्रतिभयमुद्देशं जामाता जीमूतवाहनो गत इति शङ्कित एवास्म्यनेन। तत्त्वरितं विज्ञायागच्छ किमसौ स्वगृहमागतो नवेति। यावत्तत्र गच्छामि। (परिक्रामन्नग्रे दृष्ट्वा) अयमसौ राजर्षिर्जीमूतवाहनस्य पिता जीमूतकेतुरुटजाङ्गने सह सधर्म्मचारिण्या राजपुत्र्या च पर्य्युपास्यमानस्तिष्ठति ।(१)

तथाहि

क्षौमे भङ्गवती तरङ्गतरले फेणाम्बुतुल्ये वहन्
जाह्नव्येव विराजितः सुपयसा देव्या महापुण्यया।

कुतूहली निष्क्रान्तो गृहादिति शेषः चिरयति विलम्बं करोति इति हेतोः दुःखं सविषादमित्यर्थः (क्रियाविशेषणं) आस्ते तिष्ठति। सन्निहितगरुड़प्रतिभयं सन्निहितेन आगतेन गरुड़ेन प्रतिभयं भयङ्करं उद्देशं स्थानं। शङ्कितः भीतः। अनेन तत्र गमनश्रवणेन। त्वरितं शीघ्रं। असौ जीमूतवाहन इत्यर्थः। जीमूतकेतुः जीमूतवाहनस्य पितृनाम। उटजाङ्गने उटजस्य पर्णशालायाः अङ्गने "पर्णशालोटजोऽस्त्रिया"मित्यमरः, सधर्म्मचारिण्या सह धर्मं चरतीति पत्न्येत्यर्थः तदुक्तं "सस्त्रीको धर्ममाचरेदिति" "पत्नीपाणिगृहीता च द्वितीया सहधर्म्मिणी"त्यमरः, राजपुत्र्या सत्यवत्येत्यर्थः, पर्य्युपास्यमानः सेव्यमानः ॥ १ ॥

क्षौमे। भङ्ग...तरले भङ्गास्तरङ्गाः सन्त्यस्या इति नदीत्यर्थः "भङ्गस्तरङ्ग ऊर्म्मिर्वे"त्यमरः, तस्यास्तरङ्गैस्तरले चञ्चले "चञ्चलं तरलञ्चैव पारिप्लवपरिप्लवे" इत्यमरः, फेणाम्बुतुल्ये फेणजलसदृशे शुभ्रे इत्यर्थः क्षौमे अतसीवल्कलनिर्मिते वस्त्रे "वाल्कं क्षौमादी"त्यमरः, वहन् दधत् अतएव सुपयसा निर्मलजलया महापुण्यया पवित्रया देव्या जाह्नव्या गङ्गयेव कलत्रा विराजितः शोभितः अयं दृश्यमान इत्यर्थः

धत्ते तोयनिधेरयं सुसदृशीं जीमूतकेतुः श्रियं
यस्यैषान्तिकवर्त्तिनी मलयवत्याभाति वेला यथा ॥ (१)
तद्‌यावदुपसर्पामि ॥

(ततः प्रविशति पत्नीवधूसमेतो * जीमूतकेतुः) ॥

जीमू। भुक्तानि यौवनसुखानि यशोऽवकीर्णं
राज्ये स्थितं स्थिरधिया चरितं तपोऽपि।
श्लाघ्यः सुतः सुसदृशान्वयजा स्नुषेयं
चिन्त्यो मया ननु कृतार्थतयाद्य मृत्युः ॥ (२)

जीमूतकेतुः तोयनिधेः समुद्रस्य सुसदृशीमतितुल्यां श्रियं शोभां धत्ते धारयति यस्य अन्तिकवर्त्तिनी समीपस्था एषा मलयवती वेला यथा आभाति शोभते। अत्र वृत्तं शार्दूलविक्रीड़ितम् ॥ १ ॥

* पत्नीवधूसमेतः पत्नी स्त्री च वधूः स्नुषा च "वधूर्जाया स्नुषा स्त्री च" इत्यमरः ताभ्यां समेतः युक्तः।

भुक्तानीति। यौवनसुखानि यौवने तारुण्ये यानि सुखानि तानि भुक्तानि, यशोऽवकीर्णं यशोभिः राज्यशासनयुद्धजयलाभाद्यैरिति शेषः अवकीर्णे व्याप्ते राज्ये स्थितं, स्थिरधिया दुःखादुःखादिष्वचलस्वभावेन तदुक्तं "दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः। वीतरागभयक्रोधः स्थिरधीर्मुनिरुच्यते" इति वेदान्तसारे, तपः अपि सम्प्रति चरितमनुष्ठितं, (सर्वत्र मयेति कर्त्तृपदमूह्यं) श्लाघ्यः प्रशस्यः सुतः वर्त्तते इति शेषः सुसदृशान्वयजा सुसदृशे अस्मदनुरूपे अन्वये वंशे "अन्वावायोऽन्वयो वंश" इत्यमरः, जायत इति इयं स्नुषा पुत्रपत्नी वर्त्तते इति शेषः अतः वंशलोपाशङ्काभावः सूचितः, ननु नन्विति अवधारणे "प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु" इत्यमरः, अद्य अधुना मया कर्त्रा कृतार्थतया कृतः अनुष्ठितः अर्थः प्रयोजनं येन स तस्य भावस्तत्ता तया हेतुना मृत्युः चिन्त्यः। अधुना मरणमेव मे श्रेय इत्यर्थः। अत्र वसन्ततिलकवृत्तम्। (२)

सुनन्दः। (सहसोपसृत्य) जीमूतवाहनस्य। *

जीमू। (कर्णौ पिधाय) शान्तं पापं। †

वृद्धा। पड़िहदं क्खु एदं अमङ्गलं। (१)

मलयवती। वेवदि मे हिअअं इमिणा दुण्णिमित्तेण॥ (२)

जीमू। (वामाक्षिस्पन्दनं सूचयित्वा) भद्र किं जीमूतवाहनस्य।

सुनन्दः। जीमूतवाहनस्य वार्त्तामन्वेष्टुं महाराजविश्वावसुना युष्मदन्तिकं प्रेषितोऽस्मि §॥

जीमू। किमसन्निहितस्तत्र मे वत्सः॥

वृद्धा। (सविषादं) महाराअ जइ तहिं ण सण्णिहिदो ता कहिं गदो मे पुत्तओ भविस्सदि। (३)

---

(१) प्रतिहतं खल्वेतदमङ्गलम्। ‡

(२) वेपते मे हृदयमनेन दुर्निमित्तेन। **

(३) यदि तत्र न सन्निहित स्तत् क्व गतो मे पुत्रको भविष्यति।

---

* जीमूतवाहनस्य वार्त्तां मन्वेष्टुमिति शेषः इति सुनन्दस्य वाक्यशेषः। इदं पताकास्थानं। जीमूतकेतुना स्वतनयरित्युक्तिं तत्वाप्रविष्टेन सुनन्देन जीमूतवाहनस्येति कथनात् जीमूतवाहनस्यैव मृत्युः सूचितः वस्तुतस्तु नायं राज्ञः सुनन्दस्य वाभिप्रायः अपि तु वाक्प्रयोगमहिम्नैवेदृशं प्रतीतमिति तदुक्तं साहित्यदर्पणे, "पताकास्थानकं योज्यं सुविचार्येह वस्तुनि। यत्रार्थे चिन्तितेऽन्यस्मिन् तल्लिङ्गोऽन्यः प्रयुज्यते। आगन्तुकेन भावेन पताकास्थानकन्तु तत्"दिति।

† शान्तं निरस्तं भवत्विति शेषः। पापं जीमूतवाहनस्वतनयरूपम्।

‡ प्रतिहतं दूरीकृतं एतत् प्रतीयमानं अमङ्गलं स्वतनयरूपं।

** वेपते कम्पते। दुर्निमित्तेन सुनन्दवाक्यसूचितेनेति शेषः।

§ युष्मदन्तिकं युष्माकं सकाशं। प्रेषितः प्रेरितः।

जीमू। नूनमस्मत्प्राणरक्षार्थं * गतो भविष्यति।

मल। (सविषादमात्मगतम्) अहं उण अज्जउत्त अपेक्खन्तो अस्सं एव्व किम्पि आसङ्कामि॥ (1)

सुनन्दः। आज्ञापय किं मया स्वामिनो ‡ निवेदनीयम्॥

जीमू। (वामाक्षिस्पन्दनं सूचयित्वा) जीमूतवाहनविरहयतीति पर्य्याकुलोऽस्मि हृदयेन।

स्फुरसि किमु दक्षिणेतर मुहुर्मुहुः सूचयन्ममानिष्टम्।

हतचक्षुरपहृतं ते स्फुरितमिहार्यं करिष्यते भानुः॥ (२)

(ऊर्द्ध्वमवलोक्य) अयमेव त्रिभुवनैकचक्षुर्भगवान् सहस्रदीधितिः स्फुटं जीमूतवाहनस्य श्रेयः करिष्यति। (विलोक्य सविस्मयम्)**

---

(1) अहं पुनरार्य्यपुत्रमप्रेक्षमाणा अन्यदेव किमपि आशङ्के। †

---

* अस्मत्प्राणरक्षार्थं अस्माकं प्राणानां रक्षार्थं फलमूलादिकमाहर्त्तुमिति भावः।

† अन्यदेव किमपि आर्य्यपुत्रस्यात्ययरूपमित्यर्थः।

‡ स्वामिन इति शेषे षष्ठी।

स्फुरसीति। रे दक्षिणेतर वाम हतचक्षुः नेत्रहतक मम अनिष्टममङ्गलं सूचयत् ज्ञापयत् सत् किमु कथं मुहुर्मुहुः पुनःपुनः स्फुरसि स्पन्दसे त्वमिति शेषः तदुक्तं मात्स्ये "अङ्गदक्षिणभागे तु शस्तं प्रस्फुरणं भवेत्। अप्रशस्तं तथा वामे पृष्ठस्य हृदयस्य चे"ति। अयं दृश्यमानः भानुः सूर्य्यः ते तव स्फुरितं स्पन्दनमिह मयि विषये अपहृतं अफलं करिष्यते। गीतिवृत्तमिदं तल्लक्षणं "आर्य्याप्रथमार्द्धसमं यस्या अपरार्द्धमाह तां गीति"मिति (२)। ** त्रिभुवनैकचक्षुः त्रिभुवनस्य लोकत्रयस्य एकमद्वितीयं चक्षुर्नेत्रमिव तदभावे दर्शनस्याभावादिति। भगवान् "ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इति स्मृतः" इति तद्विशिष्टः सहस्रदीधितिः सहस्रं दीधितयः किरणा

आलोक्यमानमतिलोचनदुःखदायि
रक्तच्छटा निजमरीचिरुचो विमुञ्चत्।
उत्पातवाततरलीकृततारकाभं
एतत् पुरः पतति किं सहसा नभस्तः ॥ (१)

कथं चरणयोरेव पतितम्। (सर्वे निरूपयन्ति) ॥

जीमू। अये कथं लग्नसरसमांसचूड़ामणिः *। कस्य पुनरयं स्यात् ॥

वृद्धा। (सविषादम्) महाराअ पुत्तअस्स विअ मे एदं चूड़ारअणं ॥ (२)

मल। अम्ब मा एव्वं भण। (३)

---

(२) महाराज पुत्रकस्येव मे एतच्चूड़ारत्नम्।

(३) अम्ब मैवं भण।

यस्य सः सूर्यं त्र इत्यर्थः "भानुर्हंसः सहस्रांशु"रित्यमरः। श्रेयः मङ्गलं (प्रशस्यशब्दात् ईयसुन् प्रशस्यस्य श्रः इति आदेशः)

आलोक्यमानमिति। आलोक्यमानं मयेति शेषः अतिलोचनदुःखदायि अतिचक्षुःपीड़ाकरं रक्तच्छटाः रक्तानां छटा धारा निजमरीचिरुचः निजाः स्वकीयाः मरीचीनां रुचः दीप्तीः (बहुव्रीहिणा रक्तच्छटाविशेषणं वा) विमुञ्चत् पातयत् उत्पात...आभं उत्पाते यो वातः वायुः तेन तरलीकृता चञ्चलीकृता या तारका तदाभं तत् सदृशं उल्कातुल्यमित्यर्थः किमेतत् पुरः समीपे सहसा नभस्तः आकाशात् पतति। अत्र वसन्ततिलकवृत्तम्। (१)

* लग्नसरसमांसः लग्नं सरसं आर्द्रं रक्ताक्तमित्यर्थः मांसं यत्र स तथोक्तः चुड़ामणिः शिरोरत्नं।

सुनन्दः। महाराज मैवमविज्ञाय विक्लवो भूः *। अत्र हि तार्क्ष्येण भक्ष्यमाणानां नागाधिपानामनेके नखमुखोत्खाताः † पतन्त्येते शिरोमणयः।

जीमू। देवि सोपपत्तिकमभिहितम् ‡। कदाचिदेवमपि स्यात्॥

वृद्धा। सुणन्दअ जाव इमाए वेलाए ससुरसदणं एव्व आगदो मे पुत्तओ भविस्सदि। ता गच्छ जाणिअ लहुं सम्पादेहि॥ (१)

सुनन्दः। यदाज्ञापयति देवी। (इति निष्क्रान्तः)।

जीमू। देवि अपि नागचूड़ामणिः स्यात्॥

(ततः प्रविशति रक्तवस्त्रसम्वीतः शङ्खचूड़ः)।

शङ्ख। (सास्रम्) गोकर्णमर्णवतटे त्वरितं प्रणम्य

प्राप्तोऽस्मि तां खलु भुजङ्गमवध्यभूमिम्।

---

(१)। सुनन्दक यावदनया वेलया श्वशुरसदनमेवागतो मे पुत्रको भविष्यति। तद्गच्छ ज्ञात्वा लघु सम्पादय। **

---

* मा भूः न भव त्वमिति शेषः (माङि लुङ् इति लुङ् नमाङ्योगे इत्यड़ागमनिषेधः।)

† नखमुखोत्खाताः नखाग्र मुखाग्र गरुड़स्येति शेषः तेन अथवा नखानां मुखैः उत्खाताः उत्क्रुटिताः।

‡ सोपपत्तिकं उपपत्त्या युक्त्या सह वर्त्तमानं ("शेषाद्विभाषे"ति समासान्तः कः)

** ज्ञात्वा आगमनोपायमिति शेषः लघु शीघ्रं सम्पादय अनुतिष्ठ यथा पुत्र आगच्छेदिति शेषः।

गोकर्णमिति। अर्णवतटे समुद्रतीरे स्थितमिति शेषः गोकर्णं तदाख्यं शिवं प्रणम्य त्वरितं शीघ्रं तां भुजङ्गमवध्यभूमिं भुजङ्गमानां

आदाय तं नखमुखक्षतवक्षसम्
विद्याधरं गगणमुत्पतितो गरुत्मान् ॥ (१)

(सदम्) हा महासत्त्व हा परमकारुणिक हा निष्कारणैकबान्धव हा परदुःखदुःखित क्व गतोऽसि प्रयच्छ मे प्रतिवचनं । हा शंखचूड़हतक कृतं त्वया *।

नाहिलाषा कीर्त्तिरेकाहमात्रा
नापि श्लाघ्या स्वामिनोऽनुष्ठिताज्ञा ।
दत्त्वात्मानं रक्षितोऽन्ये न मोघो
हाधिक् कष्टं वञ्चितो वञ्चितोऽस्मि ॥ (२)

तथाहमेवम्बिधः क्षणमपि जीवन्नुपहास्यमात्मानं करोमि । यावदेतदनुगमनं प्रति यतिष्ये । (परिक्रामन् भूमौ दत्तदृष्टिः) आदावुत्पीड़पृथ्वीं प्रविरलपतितस्थूलविन्दुं ततोऽग्रे

वध्यभूमिं वधस्थानं खलु प्राप्तोऽस्मि अहमिति शेषः । गरुत्मान् गरुड़ः नखमुखक्षतवक्षसं नखानां मुखैः अग्रैः अथवा नखैः मुखेन चञ्च्वा च क्षतं विदारितं वक्षः यस्य स तथोक्तं तं विद्याधरं जीमूतवाहनमित्यर्थः आदाय गृहीत्वा गगणमाकाशमुत्पतितः उत्पत्य गतः । अत्र वसन्ततिलकवृत्तम् । (१)

* त्वया कृतं किमपि साध्यं नासीत्यर्थः कृतमित्यलमर्थकमव्ययम् ।

नेति । आत्मानं देहं दत्त्वा एकाहं एकमहः (उत्तमैकाभ्यामह्न इति संख्यापूर्वकत्वेऽपि नाह्नादेशः) व्याप्य अहिश्लाघा अहीनां श्लाघ्यं यस्यां सा कीर्त्तिः यशः न आप्ता प्राप्ता नापि स्वामिनः प्रभोः श्लाघ्या प्रशस्या आज्ञा अनुष्ठिता उभयत्र त्वयेति कर्त्तृपदमूह्यम् । अन्येन कर्त्ता रक्षितः त्वमिति शेषः मोघः निष्फलः हाधिक् कष्टं (अव्ययं) वञ्चितो वञ्चितः असि त्वमिति शेषः अकृतकार्य्यत्वादित्यर्थः । अत्र शालिनीछन्दः तल्लक्षणं यथा "मात्तौ गौचेच्छालिनी वेदलोकै"रिति । (२)

आदाविति । आदौ प्रथमं उत्पीड़ः फेणः तद्वत् पृथ्वीं स्थूलां

ग्रावस्वायामशीर्णप्रसृततनुकणां कीटकीर्णां स्थलीषु ।
दुर्लक्ष्यां धातुभित्तौ घनतरुशिखरे श्याननीलस्वरूपाम्
एनां तार्क्ष्यं दिदृक्षुर्निपुणमनुसरन् रक्तधारां व्रजामि ॥ (१)

वृद्धा । (सबाष्पम्) महाराअ एसो ससोओ विअ अरुणवअणो इदो एव्व तुरिदं आअच्छन्तो हिअअं मे आकुलीकरेदि । ता जाणीअदु दाव को एसोत्ति । (२)

जीमू । यथाह देवी । (आकर्ण्य सहर्षं विहस्य) देवि मुञ्च शोकं । अस्यायं चूडामणिर्नूनं मांसलोभात् केनापि

---

(२) महाराज एष सशोक इव अरुणवदन * इत एव त्वरितमागच्छन् हृदयं मे आकुलीकरोति । तद् ज्ञायतां तावत् क एष इति ।

ततः तदनन्तरं प्रविरलपतितस्थूलबिन्दुं प्रविरलं यथा स्यात्तथा पतिताः स्थूला बिन्दवो यस्यां सा तां अग्रे समीपे ग्रावसु प्रस्तरेषु "पाषाणप्रस्तरग्रावोपलाश्मानः" इत्यमरः, आयाम...कर्णा आयामेन दैर्घ्येण दूरात्पतनेनेत्यर्थः शीर्णाः चूर्णीकृताः प्रसृताः प्रसारिताः तनवः सूक्ष्माः कणा यस्यां सा तां स्थलीषु अकृत्रिमभूमिषु (जानपदेत्यादिना स्थली अकृत्रिमा चेदिति ङीष्) कीटकीर्णां कीटव्याप्तां धातुभित्तौ धातुभिः गैरिकादिभिः भित्तौ युक्ते इत्यर्थः घनतरुशिखरे घनतरूणां निबिडतरूणां शिखरे अग्रभागे दुर्लक्ष्यां दुरुपलभ्यां श्याननीलस्वरूपां श्यानेन घनत्वेन "श्यानं स्निग्धे प्रतिध्याने घनत्वालस्ययोरपीति" मेदिनी, नीलं कृष्णवर्णं "कृष्णे नीलासितश्यामकालश्यामलमेचकाः" इत्यमरः, स्वरूपं यस्यास्तां एनां दृश्यमानामित्यर्थः रक्तधारां निपुणं यथा स्यात्तथा अनुसरन् अनुगच्छन् तार्क्ष्यं गरुडं दिदृक्षुः द्रष्टुमिच्छुः सन् व्रजामि गच्छामि अहमिति शेषः । स्रग्धरावृत्तम् । (१)

* अरुणवदनः अरुणं ईषद्रक्तवर्णं प्रखररविकिरणातप्तत्वादिति भावः वदनं यस्य स तथोक्तः ।

पक्षिणा मस्तकादुत्खाय * आनीयमानोऽस्यां भूमौ पपात ।

वृद्धा । (सपरितोषं मलयवर्तीं समालिङ्ग्य) अविधवे धीरा होहि । ण क्खु ईदिसी आकिदी वेहव्वदुक्खं अणुहोदि । (१)

मल । (सहर्षम्) अम्ब तुम्हाणं आसिसां पसाएण । (२) (पादयोः पतति) ।

जीमू । वत्स कथमिव । ‡

शङ्ख । दुःखातिभारात् वाष्पोपरुद्धकण्ठो § न शक्नोमि कथयितुं ।

जीमू । आवेदय ममात्मीयं पुत्र दुःखं सुदुःसहं ।
संक्रान्तमस्तु हृदये येन सह्यं भविष्यति । (३)

शङ्ख । श्रूयतां । शङ्खचूड़ोनाम नागः खल्वहम् । आहारार्थं वासुकिना वैनतेयाय प्रेषितः । किम्वा विस्तरेण । कदाचि-

---

(१) अविधवे धीरा भव । न खल्वीदृशी आकृतिर्वैधव्यदुःखमनुभवति । †
(२) अम्ब युष्माकमाशिषां प्रसादेन ।

---

* नूनं निश्चितम् उत्खाय उद्धृत्य ।

† अविधवे विगतः धवः पतिर्य्यस्याः सा "धवः पुमान् नरे धूर्त्ते पत्यौ" विति मेदिनी, सा न भवतीति तत्सम्बुद्धौ । ईदृशी आकृतिः सुलक्षणयुक्ता मूर्त्तिरित्यर्थः ।

‡ वत्सेति शङ्खचूड़सम्बोधनम् । कथमिव किं जातन्तवेत्यर्थः ।

§ वाष्पोपरुद्धकण्ठः वाष्पेण अश्रुणा उपरुद्धः बद्धः कण्ठो यस्य स प्रतिहतवाक्प्रसर इत्यर्थः ।

आवेदयेति । हे पुत्र वत्स आत्मीयं तवेत्यर्थः सुदुःसहं अतिदुर्वहं दुःखं मम सह्यमित्यर्थः आवेदय कथय त्वमिति शेषः । हृदये ममेति शेषः संक्रान्तं प्रविष्टमस्तु भवतु येन मत्संक्रान्तत्वेन हेतुना सह्यं सहनयोग्यं भविष्यति दुःखमिति शेषः विभक्तत्वादिति भावः । (३) ।

दियं रुधिरधारापद्धतिः पांशुभिरवकीर्य्यमाणा दुर्लक्षता-मुपयाति *। तत् संक्षेपतः कथयामि।

विद्याधरेण केनापि करुणाविष्टचेतसा।
मम संरक्षिताः प्राणा दत्त्वात्मानं गरुत्मते॥ (१)

जीमू। कोऽन्य एवं परहितव्यसनो †। वत्स ननु स्पष्टमेवो-च्यतां जीमूतवाहनेनेति। हा हतोऽस्मि मन्दभाग्यः।

वृद्धा। हा पुत्तक कहं तए एदं कअं। (२)

मल। कहं सच्चोभूदं एव्व दुच्चिन्तिदं।(३)(सर्वे मोहं गच्छन्ति)।

गरु। (स्वगतम्) नूनमेतौ पितरौ तस्य महासत्त्वस्य। कथमप्रियवादिना मया इमामवस्थां नीतौ। अथवा विषा-द्वते विषधरस्य मुखात् किमन्यन्निःसरति। अहो प्राणप्रदस्य सुसदृशं प्रत्युपकृतं जीमूतवाहनस्य शङ्खचूडेन ‡। तत्किमधु-

(२) हा पुत्रक कथं त्वयैतत् कृतम्।
(३) कथं सत्यीभूतमेव दुश्चिन्तितम्।

* विस्तरेण बहुकथनेन (विपूर्वात् स्तृधातोः शब्दार्थे घञ्) "विस्तारो विग्रहो व्यासः शब्दानां स तु विस्तर" इत्यमरः। रुधिरधारापद्धतिः पद्भ्यां हन्यते गम्यते इति पद्धतिः पन्था इत्यर्थः रुधिरधाराणां या पद्धतिः सा पांशुभिः धूलिभिः अवकीर्य्यमाणा व्याप्यमाना सती दुर्लक्षतामदृश्यत्वमुपयाति प्राप्नोति।

विद्याधरेणेति। करुणाविष्टचेतसा करुणया दयया आविष्टं आक्रान्तं चेतो मनो यस्य स तथोक्तेन केनापि अनिर्द्दिष्टनाम्ना विद्याधरेण गरुत्मते गरुड़ाय आत्मानं स्वशरीरं दत्त्वा मम प्राणाः संरक्षिताः विनाशादिति शेषः। (१)

† परहितव्यसनी परहिते व्यसनमासक्तिर्विद्यतेऽस्येति "व्यसनन्त्वशुभे सक्ता" विति मेदिनी ‡ नीतौ प्रापितौ पितराविति शेषः (नयतिर्द्विकर्मकः

नैवात्मानं व्यापादयामि । अथवा समाश्वासयामि तावदेतौ । तात समाश्वसिहि । अम्बा समाश्वसितु । (उभौ समाश्वसितः) ।

वृद्धा । वच्छे उट्ठेहि मा रोअ । अह्मे किं जीमूदवाहणेण विणा जीवह्म । ता समस्सस दाव । (१)

मल । (समाश्वस्य) अज्जउत्त कहिं मए तुमं पेक्खिदव्वो ।(२)

जीमू । हा वत्स गुरुचरणशुश्रूषाविधिज्ञ * ॥

चूडामणिं चरणयोर्मम पातयता त्वया ।
लोकान्तरगतेनापि नोज्झितो विनयक्रमः ॥ (३)

(चूडामणिं गृहीत्वा) हा वत्स कथमेतावन्मात्रदर्शनः † संवृत्तोऽसि । (हृदये दत्त्वा) अहह

---

(१) वत्से उत्तिष्ठ । मा रुदिहि । वयं किं जीमूतवाहनेन विना जीवामः । तत् समाश्वसिहि तावत् ।

(२) आर्यपुत्र क्व मया त्वं प्रेक्षितव्यः ।

प्रधानकर्मणि क्तः) विषाहृते विषभिन्नमित्यर्थः (विषादित्यत्र ऋते योगे अन्यारादित्यादिना पञ्चमी) विषधरस्य सर्पस्य । अत्र वचनस्य विषाङ्कुरे॰ ऽप्यभेदाध्यवसायाङ्कुरेऽभेदरूपातिशयोक्तिः । सुवदनावृत्तप्रकारान्तरूपम् ।

* गुरुचरणशुश्रूषाविधिज्ञ गुरुचरणयोः शुश्रूषायाः सेवाया विधिं विधानं जानातीति "विधिर्विधाने दैवेच" इत्यमरः (आतोऽनुपसर्गे इति कः)

चूडामणिमिति । मम चरणयोः चूडामणिं स्वशिरोरत्नं पातयता क्षिपता ददतेत्यर्थः त्वया कर्त्रा लोकान्तरगतेन अन्यो लोकः लोकान्तरं (मयूरव्यंसकादित्वात् समासः) तद्गतेनापि विनयक्रमः पित्रादिपूजाप्रकारः न उज्झितः त्यक्तः । (३)

† एतावन्मात्रदर्शनः एतत् परिमाणमस्येति एतावत् (यत्तदेतेभ्यः परिमाणे वतुप्) एतावदेव एतावन्मात्रं चूडामणिप्राप्तिरूपं दर्शनं यस्य स तथोक्तः ।

भक्त्या सुदूरमवनामितनम्रमौलेः
शश्वत्तव प्रणमतश्चरणौ मदीयौ ।
चूडामणिर्निकषणैर्मसृणोऽप्यहिंस्रो
गाढं विदारयति मे हृदयं कथन्नु ॥ (१)

वृद्धा । हा पुत्त जीमूदवाहण जस्स दे गुरुजणसुस्सूसं वज्जिअ अण्णं सुहं ण रोअदि सो कहिं दाणिं पिदरं उज्झिअ सोग्गसुहमणुहोदुं गदोऽसि । (२)

जीमू । (सास्रम्) देवि किं जीमूतवाहनेन विना जीवामो वयं येनैवं प्रलपसि ।

मल । (पादयोर्निपत्य कृताञ्जलिः) तात देहि मे अज्जउत्तचिह्नं चूडामणिं जेण एदं हिअए कदुअ जलणप्पवेसेण अवणेमि

---

(२) हा पुत्र जीमूतवाहन यस्य ते गुरुजनशुश्रूषां वर्जयित्वा अन्यत् सुखं न रोचते* । स कथमिदानीं पितरावुज्झित्वा स्वर्गसुखमनुभवितुं गतोऽसि ।

भक्त्येति । भक्त्या पूज्यानुरागेण हेतुना "भक्तिः पूज्येष्वनुराग" इत्यमरः, सुदूरमतिदूरं भूमाविलार्थः अवनामितनम्रमौलेः अवनामितः नम्रः मौलिः मस्तकं येन स तथोक्तः शश्वत् पुनः पुनः "मुहुः पुनः पुनः शश्वदभीक्ष्णमसकृत् समा" इत्यमरः, मदीयौ मम इमौ चरणौ पादौ प्रणमतः तव चूडामणिः शिरोरत्नं निकषणैः उल्लेखनैः करणैः मसृणः अकर्कशः "मसृणोऽकर्कशे स्निग्धे" इति मेदिनी, अतएव अहिंस्रः अव्यथकोऽपि कथं नु इत्याश्चर्यं, मे मम हृदयं वक्षःस्थलं गाढं भृशं विदारयति व्यथयति इत्यर्थः । अत्र विदारणकारणाभावेऽपि विदारणोक्त्या विभावनालङ्कारः तदुक्तं दण्डिना "प्रसिद्धहेतुव्यावृत्त्या यत्किञ्चित्कारणान्तरम् । यत्र स्वाभाविकत्वं वा विभाव्यं सा विभावने"ति । (१)

* यस्य ते तुभ्यं (रुच्यर्थानां प्रीयमाण इति चतुर्थी) यस्य ते तवेति पाठे तु शेषे षष्ठी.नैतत् सम्यक् ।

हिञ्रयस्स सन्दावदुक्खम्। (१)

जीमू। पतिव्रते किमेवमाकुलयसि ननु सर्वेषामेवास्माकमयं निश्चयः।

वृद्धा। महाराअ ता किं अञ्जो हि पड़िपालीअदि। (२)

जीमू। न खलु देवि किञ्चित। किन्त्वाहिताग्नेर्नान्येनाग्निना संस्कारो विहितः। अतोऽग्निहोत्रशरणादग्नीनादायागमनमुद्दीपयामः। ‡

मल। (आत्मगतम्) कष्टं ममैकस्य कृते सकलमेवेदं विद्याधरकुलमुच्छिन्नम्। तदेवं तावत्। (प्रकाशम्) तात न

---

(१) तद् हि मे आर्यपुत्रचिह्नं चूड़ामणिं येनैनं हृदये कृत्वा ज्वलनप्रवेशेन अपनयामि हृदयस्य सन्तापदुःखम्। *

(२) महाराज तत् किमस्माभिः प्रतिपाल्यते। †

---

* आर्यपुत्रचिह्नं आर्यपुत्रस्य पत्युः चिह्नं अनुमरणोपयुक्तं तदुक्तं "देशान्तरमृते पत्यौ साध्वी तत्पादुकाद्वयं। निधायोरसि संशुद्धा प्रविशेज्जातवेदस"मिति ब्रह्मपुराणे। पादुकाद्वयमित्यत्र चिह्नमात्रोपलक्षणमिति रघुनन्दनः। † प्रतिपाल्यते विलम्बः क्रियते इत्यर्थः।

‡ न किञ्चित् विलम्बकारणमस्तीति शेषः। किन्तु आहिताग्नेः आहितः चिरस्थापितः अग्निर्येन सः अग्निहोत्रीत्यर्थः तस्य अन्येन आहितात् इति शेषः अग्निना न संस्कारः विहितः शास्त्रकारैरिति शेषः। अतः हेतोः अग्निहोत्रशरणात् अग्निहोत्रं यावज्जीवनसाध्यो यागविशेषः तस्य शरणात् गृहात् "शरणं गृहरक्षित्रो"रित्यमरः। उद्दीपयामः दहामः। तदुक्तं "तस्मिन् बर्हिरास्तीर्य्य कृष्णाजिनस्योत्तरं लोम तस्मिन् प्रेतं संवेशयन्त्युत्तरेण गार्हपत्यं हृत्वाहवनीयमभिमुखशिरस"मिति आश्वलायनगृह्यसूत्रे। अन्यच्च गृह्यपरिशिष्टे "गृह्याग्निना दहेदनाहिताग्नेस्तत्पत्न्याश्च समस्तकायाः कपालजेनान्येषां लौकिकेन वे"त्यादि। "अन्यमपि जातोऽपि तस्मादन्ये इमं दहे"ति एकादशीतत्त्वधृतवचनम्।

खल्वनिश्चित्यैव युक्तमिदमीदृशं साहसमनुष्ठातुम्। सविचाराणि हि दैवविलसितानि*। कदाचिन्नायं नाग इति ज्ञात्वा परित्यजेन्नागशत्रुः। तदनयैव दिशा वैनतेयमनुसरामस्तावत्।

वृद्धा। सव्वहा देवदाणं पसादेण जीवन्तस्स पुत्तअस्स सुहं दंसेम। (१)

मल। (आत्मगतम्) दुल्लहं क्खु एदं मम मन्दभग्गाए। (२)

जीमू। वत्स अवितथैषा तव भारती भवतु। तथापि साग्नीनामेवास्माकं युक्तमनुसर्त्तुं†। तदनुसरतु भवान्। वयमप्यग्निशरणादग्निमादाय त्वरितमेवानुगच्छामः। (पत्नीवधूसमेतो निष्क्रान्तः)।

शङ्ख। तद् यावद्गरुडमनुसरामि। (अग्रतो निर्वर्ण्य)

कुर्वाणो रुधिरार्द्रचञ्चुकषणैर्द्रोणीरिवाद्रेर्नवाः

प्रोत्खातवनान्तरः स्वनयनज्योतिःशिखाश्रेणिभिः।

मज्जद्वज्रकठोरघोरनखरप्रान्तावगाढावनिः

(१) सर्वथा देवतानां प्रसादेन जीवतः पुत्रस्य सुखं पश्यामः।

(२) दुर्लभं खल्वेतत् मम मन्दभाग्यायाः।

* हि यतः दैवविलसितानि दैवकार्य्याणि सविचाराणि सयुक्तीनि भवन्तीति शेषः कदापि देवा अयुक्तं नाचरन्तीति।

† अवितथा न वितथा अनृता सत्या इत्यर्थः। भारती वाक्यम् अस्माकं साग्नीनां अग्निसहितानां सतामित्यर्थः।

कुर्वाण इति। रुधिरार्द्रचञ्चुकषणैः रक्ताक्तचञ्चुविलेखनैः अद्रेः पर्वतस्य नवा नूतनाः द्रोणीः खातविशेषान् कुर्वाणः स...श्रेणिभिः स्वस्य नयनयोः ज्योतिःशिखानां तेजोऽर्च्चिषां श्रेणिभिः सातत्येनेत्यर्थः प्रोत्खातवनान्तरः प्लुष्टं दग्धं उत्खातसुच्छिन्नं वनान्तरं वनमध्यं येन स तथोक्तः मज्जत्...अवनिः मज्जद्भिः प्रविशद्भिः भूमाविति शेषः

शृङ्गाग्रे मलयस्य पन्नगरिपुर्दूरादसौ दृश्यते ॥ (१)

(ततः प्रविशत्यासनस्थः पुरःपतितनायको गरुड़ः)।

गरुड़ः। जन्मनः प्रभृति भुजङ्गपतीन् भक्षता नेदमाश्चर्य्यं मया दृष्टपूर्व्वं। यदयं महात्मा न केवलं न व्यथते प्रहृष्ट इव किमपि दृश्यते। तथाहि

ग्लानिर्नाधिकपीयमानरुधिरस्याप्यस्ति धैर्य्योदये-
र्मांसोत्कर्त्तनजा रुजोऽपि वहतः प्रीत्या प्रसन्नं मुखम्।
गात्रं यन्न विलुप्तमेभिः पुलकस्तत्र स्फुटो दृश्यते
दृष्टिर्मय्यपकारिणीव निपतत्यस्यापकारिण्यपि॥ (२)

ततः कुतूहलमेव जनितमस्यानया धैर्य्यवृत्त्या *। भवतु न भक्षयाम्येवैनम। पृच्छामि तावत कोऽयमिति॥

वज्रवत् कठोराणां दृढ़ानां घोराणां भयङ्कराणां नखानां प्रान्तैः अग्रभागैः अवगाढ़ा आक्रान्ता अवनिः भूमिः येन स तथोक्तः असौ पन्नगरिपुः सर्पशत्रुः गरुड़ इत्यर्थः मलयस्य शृङ्गाग्रे शिखरोपरि दूरात् दृश्यते मयेति शेषः। शार्दूलविक्रीड़ितं छन्दः। (१)

ग्लानिरिति। अधिक...रुधिरस्य अधिकं सातिशयं पीयमानं मयेति शेषः रुधिरं यस्य स तथोक्तस्यापि धैर्य्योदयैः धीरत्वाश्रयैरित्यर्थः ग्लानिर्हर्षक्षयो नास्तीति शेषः। मांसोत्कर्त्तनजा मांसस्य उत्कर्त्तनात् चञ्च्वादिभिरिति शेषः आयस्मो इति रुजः क्लेशान् वहतः अनुभवतोऽपि (अपिः भिन्नक्रमे) प्रीत्या आनन्देन मुखं प्रसन्नं भवतीति शेषः। यद्गात्रं शरीरभाग इत्यर्थः न विलुप्तं छिन्नं मयेति शेषः तत्र गात्रे इत्यर्थः एकपुलक हर्षजन्य इति शेषः स्फुटः स्पष्टः दृश्यते मयेति शेषः अस्य पुरुषस्य दृष्टिः दर्शनं अपकारिण्यपि मयि उपकारिणीव निपतति मामुपकारकमिव पश्यतीत्यर्थः। (२)

* अस्य अनया एवम्बिधया धैर्य्यवृत्त्या धैर्य्यव्यापारेण कुतूहलं ममेति

नायकः। शिरामुखैः स्यन्दत एव रक्त-
मद्यापि देहे मम मांसमस्ति।
तृप्तिं न पश्यामि च ते महात्मन्
किं भक्षणात्त्वं विरतो गरुत्मन्॥ (१)

गरुडः। (आत्मगतम्) आश्चर्यमाश्चर्यम् कथमस्यामप्यव-
स्थायामेवमूर्ज्जितमभिधत्ते *। (प्रकाशम्)

आवर्ज्जितं मया चञ्च्वा हृदयात्तव शोणितम्।
अनेन धैर्येण पुनस्त्वयाहृतमिवाद्य मे॥ (२)

तत् कस्त्वमिति श्रोतुमिच्छामि॥

नायकः। एवं क्षुदुपतप्तो† न श्रावणयोग्यस्त्वम्। कुरुष्व तावत् मम मांसशोणितेन तृप्तिम्॥

शङ्ख। (सहसोपसृत्य) ताक्ष्य न खलु न खलु साहसमनुष्ठेयं।‡ नायं नागः। परित्यजैनम्। मां भक्षय। अहं तवाहारार्थं प्रेषितोऽस्मि वासुकिना। (उरो ददाति)।

शेषः जनितमुत्पादितम्। शिरामुखैरिति। शिरामुखैः मम शिराणां अग्रभागैः अद्यापि अधुनापि रक्तं स्यन्दते क्षरति एव। अद्यापि मम देहे मांसमस्ति। हे महात्मन् महानुभाव ते तव तृप्तिं च मद्भक्षणजनितामिति शेषः न पश्यामि अहमिति शेषः। हे गरुत्मन् गरुड भक्षणात् किं कथं विरतः निवृत्तः भवसीति शेषः (जुगुप्साविरामप्रमादार्थानामुपसंख्यान-मिति पञ्चमी) उपजातिवृत्तमेतत्। (१)

* ऊर्ज्जितं बलवत् सविक्रममित्यर्थः। आवर्ज्जितमिति। मया कर्त्री चञ्च्वा करणेन तव हृदयात् वक्षसः शोणितं रक्तमावर्ज्जितं निःसारितं पुनस्तु अनेन दृढेन धैर्येण हेतुना त्वया कर्त्रा अद्य मे मम हृदयादिति शेषः आहृतमाकृष्टमिव रक्तमिति शेषः अहमतिशयव्यथितहृदयो भवामीत्यर्थः। (२) † क्षुदुपतप्तः क्षुधा क्षुधया उपतप्तः पीड़ित इत्यर्थः।

‡ साहसं सहसा बलेन कृतं "साहसन्तु बलात्कारकृतकार्य्ये दमेऽपि च"ति मेदिनी। अनुष्ठेयं कार्य्यं त्वयेति शेषः।

नायकः । (शङ्खचूडं दृष्ट्वा) कष्टं विफलीभूतो मे मनोरथः शङ्खचूडे नागच्छता * ।

गरुडः । (उभौ निरूप्य) द्वयोरपि भवतोर्वध्यचिह्नम् । कः खलु नाग इति नावगच्छामि ।

शङ्ख । स्थाने † एव भ्रान्तिः ॥

आस्तां स्वस्तिकलक्ष्म वक्षसि तनौ नालोक्यते कञ्चुको
जिह्वे जल्पत एव मे न गणिते नाम त्वया द्वे अपि ।
तिस्रस्तीव्रविषाग्निधूमपटलव्याजिह्मरत्नत्विषो
नैता दुःसहशोकसीत्कृतमरुत्पीडाः फणाः पश्यसि ॥(१)

गरुडः । (उभौ निरूप्य शंखचूडस्य फणं दृष्ट्वा) तत् कः खलु मया व्यापादितः ।

---

* शङ्खचूडेनेत्यत्र कन्यया शोक इतिवत् हेतौ तृतीया ।

† स्थाने युक्ता "युक्ते द्वे साम्प्रतं स्थाने" इत्यमरः । आस्तामिति । वक्षसि उरसि स्वस्तिकलक्ष्म त्रिकोणाकारचिह्नविशेषः आस्तां तिष्ठतु तद्व दृष्टं त्वया आहतत्वादिति शेषः । तनौ शरीरे कञ्चुकः निर्मोकः "कञ्चुको वारवाणे स्याच्चिर्मोके" इति मेदिनी, न आलोक्यते दृश्यते त्वयेति शेषः जल्पतः कथयतः एव मे मम द्वे जिह्वे अपि त्वया कथं नाम सम्भावनायां क्रोधे वा "नाम प्राकाश्यसम्भाव्यक्रोधोपगमकुत्सने" इत्यमरः, न गणिते, "कुब्जीनसद्विरसना" विति हारावली, तीव्र...त्विषः, तीव्रस्य प्रचण्डस्य विषाग्नेः धूमपटलेन धूमसातत्येन व्याजिह्मा वक्रीकृता इत्यर्थः रत्नानां शिरःस्थानामिति शेषः त्विषः दीप्तयः यासां ताः, दुःसह...पीडाः दुःसहेन दुर्वहेण शोकेन हेतुना यत्सीत्कृतं अव्यक्तशब्दः तेन उत्पन्न इत्यर्थः यः मरुत् वायुः तेन पीडयन्तीति तथोक्ताः एता दृश्यमाना इत्यर्थः तिस्रः फणाः "फटायान्तु फणा द्वयो"रित्यमरः, न पश्यसि त्वमिति शेषः एतैरपि अभिज्ञानैः मां नागत्वेन निश्चेतुं न समर्थोऽसीति भावः । अत्र शार्दूलविक्रीडितवृत्तम् । (१)

शङ्ख। विद्याधरवंशतिलको* जीमूतवाहनः। कथमकारणिकेन त्वया इदमनुष्ठितम्।

गरुड़ः। (स्वगतम्) कथमनुष्ठितम्। अयं विद्याधरकुमारो जीमूतवाहनः। यस्य हि

मेरौ मन्दरकन्दरासु हिमवत्सानौ महेन्द्राचले
कैलासस्य शिलातलेषु मलयप्राग्भारभागेष्वपि।
दिक्कुञ्जेषु च तेषु तेषु बहुशो यस्य श्रुतं तन्मया
लोकालोकविचारिचारणगणै रुद्गीयमानं यशः (१)।
सर्व्वथा महत्यंहःपङ्के निमग्नोऽस्मि।†

नायकः। भोः फणिपते किमेवमुद्विग्नोऽसि।

शङ्ख। किमस्थानमिदमावेगस्य।‡

स्वशरीरमिदं दत्त्वा तार्क्ष्यात् परिरक्षितं यदीयमिदम्।

---

* विद्याधरवंशतिलकः विद्याधरवंशश्रेष्ठः "तिलकः प्रधाने त्रिषु" इति नानार्थध्वनिमञ्जरी।

मेराविति। मेरौ सुमेरुपर्वते मन्दरकन्दरासु मन्दरपर्वतस्य गुहासु, हिमवत्सानौ हिमालयपर्वतभागे, महेन्द्राचले महेन्द्रपर्वते, कैलासस्य पर्वतविशेषस्य शिलातलेषु मलयप्राग्भारभागेषु मलयस्य तदाख्यपर्वतस्य प्राग्भारभागेषु उच्चस्थानेषु अपि तेषु तेषु सर्वेष्वित्यर्थः दिक्कुञ्जेषु दिशः कुञ्जा इव तेषु लोकालोक...गणैः लोकालोके तदाख्ये पर्वते "लोकालोकश्चक्रवाल" इत्यमरः, विचारिणः भ्रमणशीलाः ये चारणगणाः नटविशेषाः "चारणास्तु कुशीलवा" इत्यमरः, तैः कर्तृभिः उद्गीयमानं उच्चैः गीयमानं यस्य तत् प्रसिद्धं यशः मया कर्त्रा बहुशः बहुवारं श्रुतम्। शार्दूलविक्रीड़ितवृत्तम्। (१)

† अंहःपङ्के पापपङ्के "अंहो दुरितदुष्कृत"मित्यमरः।

‡ इदं किमावेगस्य उद्वेगस्य अस्थानं अनवकाशः नेति भावः।

स्वेति। इदं स्वशरीरं स्वदेहं दत्त्वा भक्षणार्थमिति शेषः यदीयं

युक्तं नेतुं भवतः पातालतलादपि तलं मां ॥ (१)

गरुड़ः । अये करुणार्द्रचेतसा अनेन महात्मना अस्मद्ग्रासगोचरपतितस्यास्य फणिनः प्राणान् रक्षितुं स्वदेह आहारार्थमुपनीतः तस्मादिदमकृत्यमेतन्मया कृतम् । किं बहुना बोधिसत्त्व एवायं व्यापादितः । तस्य महतः पापस्य अग्निप्रवेशादृते नान्यत् प्रायश्चित्तं पश्यामि तत् क्व नु खलु वह्निं समासादयामि *

(दिशः पश्यन्) अये अमी केचित् गृहीताग्नय इतएवा गच्छन्ति तद् यावदेतान् प्रतिपालयामि ॥

शङ्ख । कुमार पितरौ ते प्राप्तौ ॥

नायकः । (ससम्भ्रमम्) शङ्खचूड़ समुपविश्योत्तरीयेण आच्छादितशरीरं कृत्वा धारय माम् । अन्यथा कदाचिदीदृशं सहसैव मां दृष्ट्वा अम्बा जीवितं जह्यात् ॥

शङ्ख । (पार्श्वपतितमुत्तरीयं गृहीत्वा तथा करोति) ।

(ततः प्रविशति पत्नीवधूसमेतो जीमूतकेतुः ।)

अमेति यावत् इदं शरीरमित्यर्थः ताक्ष्यात् गरुड़ात् परिरक्षितं त्रातं पातालतलादपि तलं अध इत्यर्थः मां नेतुं प्रापयितुं भवतः तव युक्तं उचितं । अत्र पूर्वार्द्धे यच्छब्दप्रयोगात्तच्छब्दोपादानापेक्षा तदुक्तं सम्प्रदायार्थेण "प्रागुपात्तस्तु यच्छब्दस्तच्छब्दोपादानं विना साकाङ्क्ष"इति । अत्राध्याहृतम् । (१)

* अये इति विस्मये । अस्मद्ग्रासगोचरपतितस्य अस्माकं ग्रासस्य कवलस्य गोचरे विषये पतितस्य । अकृत्यमकार्य्यं पापमित्यर्थः । बोधिसत्त्वः बुद्धावतारविशेषः नान्दीव्याख्याने उक्तः । प्रायश्चित्तं पापक्षयमात्रसाधनविधिबोधितकर्मविशेषः तदुक्तं हारीतेन "प्रयतत्वाद्दोपचितमशुभं नाशयतीति" अन्यच्च "प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते । तपोनिश्चयसंयुक्तं प्रायश्चित्तमिति स्मृत"मित्यङ्गिरसा ।

जीमू । (साखम्) हा पुत्र जीमूतवाहन ॥

आत्मीयः पर इत्ययं खलु कुतः सत्यं कृपायां क्रमः
किं रक्ष्या बहवः किमेक इति ते जाता न चिन्ता कथम् ।
तार्क्ष्यात् त्रातुमहिं स्वजीवितपरित्यागं त्वया कुर्वता
येनात्मा पितरौ वधूरिति हतं निःशेषमेतत् कुलम् ॥(१)

वृद्धा । (मलयवतीमुद्दिश्य) जादे विरम मुहुत्तअं । अविरल-
णिवडन्तवाहविन्दु हिं पडिहवीअदि अअं अग्गी । (२)

(सर्वे परिक्रामन्ति) ।

---

(२) जाते विरम मुहूर्तम् । अविरलनिपतद्बाष्पबिन्दुभिरभिभूयतेऽयमग्निः । *

आत्मीय इति । आत्मीयः स्वजनः परः अनात्मीय इति अयमात्मीयः अयमनात्मीय इत्याकारज्ञानमित्यर्थः क्रमः व्यापारः कृपायां दयायां खलु इति जिज्ञासायां 'निषेधवाक्यालङ्कारजिज्ञासानुनये खलु' इत्यमरः, कुतः कथं सत्यं भवतीति शेषः न कदापीति भावः दया हि परदुःखहरणेच्छा सा कदापि न स्वपरज्ञानपक्षपातिनी जायते इति सत्यं वयं स्वीकुर्म इति भावः किन्तु किं बहवः जना इति शेषः रक्ष्याः किमेकः रक्ष्य इति शेषः इति एवंरूपा ते तव चिन्ता न जाता कथमित्याशङ्कायाह तार्क्ष्यादिति तार्क्ष्यात् गरुड़ात् अहिं सर्पं त्रातुं रक्षितुं (भीत्रार्थानां भयहेतुरिति पञ्चमी) येन त्वया कर्त्रा स्वजीवितपरित्यागं कुर्वता विनश्यता आत्मा स्वदेहः पितरौ जनकजनन्यौ वधूः जाया एतत् कुलं विद्याधरवंशः निःशेषं समग्रं हतं विनाशितमिति (हतश्च हतौ च हता च हतञ्चेति हतं "नपुंसकमनपुंसकेनैकवच्चान्यतरस्या"मित्येकशेषः) ।(१)

* जाते वत्से । विरम स्थिरा भव (व्याङ्परिभ्योरम इति परस्मैपदम् ।) अविरल···बिन्दुभिः अविरलं अश्रान्तं यथास्यात्तथा निपतद्भिः चरद्भिः बाष्पबिन्दुभिः अश्रुकणैः । अभिभूयते निर्वापोन्मुखत्वं प्राप्यते । अयमग्निः अग्निहोत्रगृहादुद्धृतोऽग्निरिति शेषः ।

जीमू। हा पुत्र जीमूतवाहन।

गरुड़ः। (श्रुत्वा) हा जीमूतवाहनेति ब्रवीति। तद्व्यक्तमयमस्य पिता। तत् किमेतद्दीप्तेनाग्निना आत्मानमुद्दीपयामि न शक्नोमि अस्य पुत्रघातलज्जया * मुखन्दर्शयितुम्। अथवा किमग्निहेतोः पर्य्याकुलोऽस्मि। तटस्थ एवास्मि जलनिधेः तत यावदिदानीम्

ज्वालाभङ्गैस्त्रिलोकग्रसनरसलसत्कालजिह्वाग्रकल्पैः
सर्पद्भिः सप्तसप्तेः पदमिव कवलीकर्त्तुमीशैः समुद्रे।
स्वैरेवोत्पातवातप्रसरपटुतरैर्धुक्षिते पक्षवातैः
अस्मिन् कल्पावसानज्वलनभयकरे वाड़वाग्नौ पतामि।(१)

(इत्युत्थातुमिच्छति)

---

* अस्य पुत्रघातलज्जया अत्र अस्येतिपदस्य पुत्रपदेन तस्य च घातलज्जेति पदेन देवदत्तस्य गुरुकुलमितिवत् प्रयोगः।

ज्वालेति। त्रिलोक···कल्पैः त्रयाणां लोकानां भुवनानां ग्रसने ग्रासे संहारे इत्यर्थः यो रस इच्छा तेन लसन्ति लोलानि यानि कालजिह्वाग्राणि यमजिह्वाग्रभागाः तेभ्य ईषदूनैः (ईषदसमाप्तौ कल्पब्देश्यदेशीयर इति कल्पप्प्रत्ययः) सर्पद्भिः प्रसरणशीलैः सप्तसप्तेः सप्त सप्तयः अश्वा यस्य स सूर्य्यः तस्य "सप्ताश्वहरिदश्वोष्णरश्मयः" इत्यमरः पदं स्थानं कवलीकर्त्तुं ग्रासीकर्त्तुमिव ईशैः समर्थैः ज्वालाभङ्गैः शिखाभङ्गिभिः विशिष्टे इति शेषः उत्पात...पटुतरैः उत्पातवातस्य उत्पातवायोः प्रसरात् पटुतरैः निपुणतरैः अधिकसमर्थैरिति यावत् स्वैर्निजैरेव पक्षवातैः पक्षजनितवायुभिः धुक्षिते ज्वालिते समुद्रे स्थिते इति शेषः (समर्थैरितिपाठे तु ज्वालाभङ्गैरित्यस्य विशेषणम्) कल्पावसानज्वलनभयकरे करोतीति करः भयस्य कर उत्पादकः भयकरः कल्पावसाने प्रलये यो ज्वलनः अग्निः तद्वत्भयकरे भयावहे अस्मिन् वाड़वाग्नौ वड़वमध्यस्याग्निविशेषे पतामि अहमिति शेषः। अत्र स्रग्धरावृत्तम्। (१)

नायकः । भोः पक्षिराज अलमनेनाध्यवसायेन । नायं प्रतीकारोऽस्य पाप्मनः ॥ *

गरुड़ः । (जानुभ्यां स्थित्वा कृताञ्जलिः) भो महात्मन् कस्तर्हि † कथ्यताम् ।

नायकः । प्रतिपालय क्षणमेकम् । पितरौ मे प्राप्तौ यावदेतौ प्रणमामि ।

गरुड़ः । एवं क्रियताम् ।

जीमू । (दृष्टा सहर्षम्) देवि दिष्ट्या वर्द्धसे । अयं वत्सो जीमूतवाहनो न केवलं ध्रियते ‡ । प्रत्युत कृताञ्जलिना गरुड़ेन शिष्येणेव पर्य्युपास्यमानस्तिष्ठति ॥

वृद्धा । महाराअ कअत्थम्हि । अक्खदसरीरस्स मुहं पेक्खिस्सं । (१)

मल । अहं अज्जउत्तं पेक्खिअ अदिपिअत्ति करिअ ण पत्तिआमि ॥ (२)

जीमू । (उपसृत्य) वत्स एह्येहि । परिष्वजस्व माम् § ॥

नायकः । (उत्थातुमिच्छन् पतितोत्तरीयो मूर्च्छति)

(१) महाराज कृतार्थास्मि । अक्षतशरीरस्य मुखं प्रेक्षिष्ये ।

(२) अहमार्य्यपुत्रं प्रेक्ष्य अतिप्रियमिति कृत्वा न प्रत्येमि ॥ **

* पाप्मनः पापस्य "अस्त्री पङ्कं पुमान् पाप्मा पापं" मित्यमरः ।

† कः प्रतीकार इति शेषः । तर्हि तदा ।

‡ ध्रियते जीवति (धृङ् अवस्थाने इति धातोर्लट्)

** अतिप्रियमिति कृत्वा अतिप्रियं भूतमिति न प्रत्येमि विश्वसिमि ।

§ एह्येहीत्यत्र हिरुक्तिर्न दोषावहा हर्षद्योतकत्वात् तदुक्तं "विषादे विस्मये हर्षे कोपे दैन्यावधारणे । प्रसादनेऽनुकम्पायां द्विस्त्रिरुक्तं न दुष्यती"ति । परिष्वजस्व आलिङ्ग त्वमिति शेषः ।

शङ्ख । कुमार समाश्वसिहि समाश्वसिहि ।

जीमू । हा वत्स ! कथं मां दृष्ट्वा अभिषङ्गं * गतोऽसि ।

वृद्धा । हा पुत्तक कहं वाआमेत्तकेणावि तुए ण सम्भाविदह्मि । (१)

मल । हा अज्जउत्त कहं गुरुअणो वि दे ण पेक्खिदव्वो । (सर्वे मोहं गच्छन्ति) । (२)

शङ्ख । हा शङ्खचूडहतक कथं गर्भस्थ एव न विपन्नोऽसि येनैवं क्षणे क्षणे मरणातिगं † दुःखमनुभवसि ।

गरुडः । सर्वमिदं मम नृशंसस्य असमीक्ष्यकारिताया विजृम्भितम् ‡ । तदेवं तावत् करोमि । (पक्षाभ्यां वीजयन्) भो महात्मन् समाश्वसिहि समाश्वसिहि ॥

नायकः । (समाश्वस्य) शङ्खचूड समाश्वासय गुरुम् ।

शङ्ख । तात समाश्वसिहि समाश्वसिहि । अम्ब समाश्वसिहि समाश्वसिहि । (उभौ समाश्वसितः) ।

वृद्धा । पुत्त कहं पेक्खन्ताणं एव्व अह्माणं कदन्तअ-एण अवहरीअसि । (३)

---

(१) हा पुत्रक कथं वाङ्मात्रेणापि त्वया न सम्भाविताऽस्मि ॥

(२) हा आर्यपुत्र कथं गुरुजनोऽपि ते न प्रेक्षितव्यः ।

(३) कथं प्रेक्षमाणानामेवास्माकं कृतान्तहतकेनापह्रियसे ॥ **

---

* अभिषङ्गं पराभूतत्वम् ।

† विपन्नः मृतः । कथं त्वं भूमिष्ठोभूतः इति भावः । मरणातिगं मरणाधिकं । ‡ असमीक्ष्यकारितायाः न समीक्ष्य विविच्य करोतीति (सह सुपेति योगविभागात् समासः अथवा उपपदमतिङिति समासः) तस्य भावस्तत्ता तस्याः विजृम्भितं विलसितम् ।

** प्रेक्षमाणानां पश्यताम् अस्माकं पश्यतोऽस्माननादृत्येत्यर्थः (षष्ठी चानादरे इति षष्ठी) ।

जीमू। देवि मैवममङ्गल्यवादिनी भव। म्रियत एवायुष्मान् * तद् वधूः समाश्वास्यताम्।

वृद्धा। (सर्वं वक्षोघातम् रोदिति) पडिहदममङ्गलम्। ण रोदिस्सं। मलयवदि समस्सस। वच्छे उट्ठेहि उट्ठेहि। वरं एत्तिअवेलं तुमं भत्तुणो मुहं पेक्ख॥ (१)

मल। (समाश्वस्य) हा अज्जउत्त। (२)

वृद्धा। (मलयवत्या मुखं पिधाय) वच्छे मा एव्वं करेहि। पडिहदं क्खु एदम्॥ (३)

जीमू। (आत्मगतम्)

विलुप्तशेषाङ्गतया प्रयातान् निराश्रयत्वादिव कण्ठदेशम्।
प्राणांस्त्यजन्तं तनयं निरीक्ष्य कथं न तापात् शतधा प्रयामि (४)

मल। हा अज्जउत्त अदिदुक्करकारिणी क्खु अहं। जा ईदिसं अज्जउत्तं पेक्खन्ती अज्जावि जीविअं ण परिच्चआमि (५)

---

(१) प्रतिहतममङ्गलम्। न रोदिष्यामि। मलयवति समाश्वसिहि। वत्से उत्तिष्ठोत्तिष्ठ। वरमेतस्यां वेलायां त्वं भर्तुर्मुखं प्रेक्षस्व।

(२) हा आर्यपुत्र।

(३) वत्से मैवं कुरु। प्रतिहतं खल्वेतत्।

(५) हा आर्यपुत्र अतिदुष्करकारिणी खल्वहम्। या ईदृशं

---

* आयुष्मान् दीर्घायुरित्यर्थः "भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः" इत्युक्तेरतिशायने मतुप्।

विलुप्तेति। विलुप्तशेषाङ्गतया विलुप्तानि विच्छिन्नानि शेषाणि कण्ठेतराणि अङ्गानि यस्य स तस्य भावस्तत्ता तया हेतुना निराश्रयत्वात् आश्रयरहितत्वादिव कण्ठदेशं प्रयातान् गतान् प्राणान् त्यजन्तं म्रियमाणमित्यर्थः, तनयं पुत्रं निरीक्ष्य दृष्ट्वा कथं तापात् सन्तापात् हेतोः शतधा शतखण्डं (संख्याया विधार्थे धा इति धा) न प्रयामि गच्छामि अहमिति शेषः। उपजातिवृत्तम्। (४)

वृद्धा। (नायकस्याङ्गानि स्पृशन्ती गरुड़मुद्दिश्य) णिस्सङ्क कहं दाणीं तुए एदं आरुहमाणजोव्वणसोहं तं एव्व एदावत्थं पुत्तअस्स मे सरीरं कअं। (१)

नायकः। अम्ब मामैवं। किमनेन कृतं। ननु पूर्व्वमप्येतदीदृशमेव परमार्थतः ‡। पश्य

मेदोऽस्थिमांसमज्जासृक्सङ्घातेऽस्मिं स्त्वचावृते।
शरीरे वास्ति का शोभा सदा वीभत्सदर्शने॥ (२)

गरुड़ः। भो महात्मन् नरकानलज्वालावलीढमिवात्मानं

आर्य्यपुत्रं प्रेक्षमाणा अद्यापि जीवितं न परित्यजामि। *

(१) निःशङ्क कथमिदानीं त्वया एतदारोहद्यौवनशोभं तदेवैतदवस्थं पुत्रकस्य मे शरीरं कृतम्। †

---

* देहं त्यजमानमित्यर्थः।

† निःशङ्क निर्भय गरुड़सम्बोधनमेतत्। आरोहद्यौवनशोभं आरोहन्ती जायमाना यौवनस्य शोभा सौन्दर्य्यं यत्र तत्तथोक्तम्।

‡ अम्ब मातः मामैवं नेदृशं कथय। अनेन गरुड़ेन किं कृतं न किमपीति भावः। परमार्थतः याथार्थ्येन। नेदं शरीरं गरुड़ेन कुत्सितं कृतमपि तु प्रकृत्यैवेदमीदृशम्।

मेद इति। मेदः···सङ्घाते मेदः वपा च अस्थीनि च मांसञ्च मज्जा अस्थिसारश्च असृक् रक्तञ्च तेषां सङ्घाते समष्टिरूपे त्वचा आवृते आच्छादिते सदा सर्व्वस्मिन् काले (सर्व्वशब्दात् "सर्व्वैकान्यकिंयत्तदः काले दा" इति दा ततः "सर्व्वस्य सोऽन्यतरस्या"मिति सर्व्वस्य सादेशः) वीभत्सदर्शने वीभत्सं निन्दितं (गुप्तिज्किद्भ्यः सन् मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्येति बधधातोः सन् ततः कर्म्मण्यच्) दर्शनं यस्य तस्मिन् शरीरे का शोभास्ति वा नकापीत्यर्थः। (२)

नरक...अवलीढं नरके योऽनलः अग्निस्तस्य ज्वालाभिः शिखाभिः अवलीढं व्याप्तम्। दुःखं अतिकष्टं क्रियाविशेषणं। मुच्येयं सत्त्वो भवेय-

मन्यमानो दुःखं तिष्ठामि। तदुपदिश्यतां येन मुच्येयमस्मादेनसः ॥ (१)

नायकः। अनुजानातु मां तातः। यावदस्य पापस्य प्रतिचयमुपदिशामि।

जीमू। वत्स एवं क्रियताम्।

नायकः। वैनतेय श्रूयताम्।

गरुड़ः। (कृताञ्जलिः) आज्ञापय।

नायकः।

नित्यं प्राणाभिघातात प्रतिविरम कुरु प्राककृतस्यानुतापं
यत्नात् पुण्यप्रवाहं समुपचिनु दिशन् सर्वसत्त्वेष्वभीतिम्।
मग्नं पुण्येषु नैनः फलति परिणतं प्राणिहिंसासमुत्थं
येनैतद्वारिपूरे लवणकणमिव क्षिप्तमन्तर्ह्रदस्य ॥ (२)

गरुड़ः। यदाज्ञापयसि।

अज्ञाननिद्राशयितो भवता प्रतिबोधितः।

अहमिति शेषः। एनसः पापात्। (१) ॥ नित्यमिति। नित्यं सततं प्राणाभिघातात् जीवनविनाशात् प्रतिविरम निवर्त्तस्व प्राक् पूर्व्वं कृतस्याचरितस्य हिंसादेरिति शेषः अनुतापं पश्चात्तापं "पश्चात्तापोऽनुतापश्च" अमरः, कुरु, सर्वसत्त्वेषु सकलप्राणिषु "सत्त्वमस्त्रीतु जन्तुषु"इति कोषः, अभीतिं अभयं दिशन् ददत् सन् यत्नात् पुण्यप्रवाहं पुण्यराशिमित्यर्थः समुपचिनु संग्रहाण सर्वत्र त्वमिति कर्तृपदमूह्यम्। येन कृतेनेति शेषः पुण्येषु पूर्वोक्तेष्विति शेषः मग्नं अन्तर्ह्रदस्य ह्रदमध्यस्य वारिपूरे जलराशौ क्षिप्तं लवणकणमिव (कणशब्दस्य क्लीबत्वं दुर्घटमिति सुधीभिर्विभाव्यम्) एतत् प्राणिहिंसासमुत्थं जन्तुवधजं एनः पापं परिणतं फलोन्मुखं सत् न फलति। स्रग्धरावृत्तमेतत्। (२)

अज्ञानेति। अज्ञाननिद्राशयितः अज्ञानमेव निद्रा तस्यां शयितः सुप्तः घोरमोहाच्छन्न इत्यर्थः भवता त्वया प्रतिबोधितः कृतज्ञानोदयः एष

सर्वप्राणिवधाद्देव विरतोऽद्यप्रभृत्यहम् ॥ (१)

सम्प्रति हि

क्वचिद्द्वीपाकारैः पुलिनविपुलैर्भोगनिवहैः

कृतावर्त्तभ्रान्तिर्वलयितशरीरः क्वचिदपि ।

व्रजन् कूलात् कूलं क्वचिदपि च सेतुप्रतिसमः

समाजो नागानां विचरतु महोदन्वति सुखम् ॥ (२)

अपि च

स्रस्तानापादलम्बान् घनतिमिरनिभान् केशपाशान् वहन्त्यः

सिन्दूरेणेव दिग्धैः प्रथमरविकरस्पर्शताम्रैः कपोलैः ।

अहं अद्यप्रभृति अद्यारभ्य सर्वप्राणिवधात् सकलजीवसंहारात् विरतः निवृत्तः भवामीति शेषः । (१)

क्वचिदिति । क्वचित् कुत्रापि द्वीपाकारैः द्वयो रापो यत्र तत् तद्वदाकारो येषां ते तथोक्तैः पुलिनविपुलैः पुलिनवत् तीरवद्विपुलैः प्रशस्तैः भोगनिवहैः सर्पकायसमूहैः "समूहनिवहव्यूहे"त्यमरः, करणैः कृतावर्त्तभ्रान्तिः कृता जनिता आवर्त्तस्य जलभ्रमस्य "स्यादावर्त्तोऽम्भसां भ्रम" इत्यमरः, भ्रान्तिः भ्रमो येन स तथोक्तः,क्वचिदपि वलयितशरीरः वलयितानि वलयाकाराणि कृतानि शरीराणि येन स तथोक्तः, क्वचिदपि च कूलात् तीरात् कूलं अपरपारं व्रजन् गच्छन् सेतुप्रतिसमः सेतुसदृशः नागानां समाजः समूहः "पशूनां समजोऽन्येषां समाज" इत्यमरः, सुखं यथास्यात्तथा महोदन्वति महासमुद्रे (उदन्वानुदधौ चेति निपातः) विचरतु । शिखरिणीवृत्तमेतत् । (२)

स्रस्तानिति । स्रस्तानसंयतानतएव आपादलम्बान् चरणपर्यन्तलम्बमानान् घनतिमिरनिभान् गाढान्धकारसवर्णान् केशपाशान् केशकलापान् "पाशः पक्षश्च हस्तश्च कलापार्थाः कचात् परे" इत्यमरः, वहन्त्यः धारयन्त्यः प्रथम...ताम्रैः प्रथमानां नवानां रविकराणां सूर्यकिरणानां स्पर्शेन सम्पर्केण ताम्रैः लोहितैरतएव सिन्दूरेणेव दिग्धैः लिप्तैः रञ्जितैरित्यर्थः कपोलैः गण्डैः विशिष्टा इत्यर्थः आयासेन वनभ्रमणजनित-

आयासेनालसाङ्ग्योऽप्यवगणितरुजः कानने चन्दनानाम्
अस्मिन् गायन्तु रागादुरगयुवतयः कीर्त्तिमेतां तवैव ॥ (१)

नायकः । साधु महासत्त्व साधु । अनुमोदामहे । सर्वथा दृढसमाधानो भव । * (शङ्खचूडं निर्दिश्य) शङ्खचूड त्वयापि स्वगृहमिदानीं गम्यताम् ।

शंख । (निश्वस्य मातरं प्रध्यायन्)

उत्प्रेक्षमाणा त्वां तार्क्ष्यचञ्चुकोटिनिपातितम् ।
त्वद्दुःखदुःखिता नूनमास्ते सा जननी तव ॥ (२)

वृद्धा । (सास्रम्) धण्णा क्खु सा जणणी जा गरुड़मुहपड़िदस्स अक्खदसरीरस्स एव्व पुत्तअस्स मुहं पेक्खिस्सदि । (३)

शंख । अम्ब सत्यमेवैतत् । यदि कुमारः स्वस्थो भविष्यति ॥

---

(३) धन्या खलु सा जननी या गरुड़मुखपतितस्याक्षतशरीरस्यैव पुत्रकस्य मुखं प्रेक्षिष्यते ।

क्लेशेन श्रमेणालसाङ्ग्यः अलसानि कार्य्यानुद्युक्तानि अङ्गानि यासां ता स्तथोक्ता अपि (एतेन गीतासामर्थ्यं सूचितं) अवगणितरुजः अवगणिताः तुच्छीकृताः रुजः क्लेशाः याभि स्तास्तथोक्ताः उरगयुवतयः नागाङ्गनाः अस्मिन् चन्दनानां कानने चन्दनवने रागात् अनुरागात् तवैव नत्वन्यस्येत्यर्थः एतां कीर्त्तिं नागपरित्राणरूपामिति शेषः गायन्तु (प्रार्थनायां लोट्)। स्रग्धरावृत्तमेतत् (१)

* अनुमोदामहे त्वदुक्तं युक्तियुक्तमिति मन्यामहे वयमिति शेषः दृढसमाधानः दृढं समाधानं चित्तैकाग्र्यं यस्य स तथोक्तः ।

उत्प्रेक्षमाणा इति । त्वां तार्क्ष्य...निपातितम् तार्क्ष्यस्य गरुड़स्य चञ्चुकोटिभिः चञ्च्वग्रैः निपातितं विनाशितमुत्प्रेक्षमाणा सम्भावयन्ती तव सा (अनुभूतार्थस्तच्छब्दः) जननी माता नूनं निश्चितं त्वद्दुःखदुःखिता त्वद्दुःखेन दुःखिता आस्ते वर्त्तते । (२)

† स्वस्थः स्वस्मिन् प्रकृतावस्थायामित्यर्थः तिष्ठतीति ।

नायकः। (वेदनां नाटयन्) अहह परार्थसम्पादनरसाक्षेपादेतावतीं वेलां मया न लक्षिता: सम्प्रति तु मां बाधितुमारब्धा मर्म्मच्छेदिन्यो वेदनाः *। (मरणावस्थां नाटयति)।

जीमू। (ससम्भ्रमम्) हा वत्स किमिदं करोषि।

वृद्धा। हा किं णु क्खु एवं वददि। (उरस्ताड़म्) परित्ताअह परित्ताअह। एसो क्खु मे पुत्तओ विवज्जइ। (१)

मल। हा अज्जउत्त परिच्चइदुकामो विअ लक्खीअसि। (२)

नायकः। (अञ्जलिं कर्त्तुमिच्छन्) शङ्खचूड़ समानय मे हस्तौ।

शंख। (तथा कुर्वन्) कष्टमनाथीकृतम् जगत्।

नायकः। (अर्द्धोन्मीलितचक्षुः पितरं पश्यन्) तात अम्ब अयं मे पश्चिमः प्रणामः।

गात्राण्यमूनि न वहन्ति सचेतनत्वं

(१) हा किं नु खल्वेवं वदति। परित्रायध्वं परित्रायध्वं। एष खलु मे पुत्रको विपद्यते। †

(२) हा आर्य्यपुत्र परित्यक्तुकाम ‡ इव लक्ष्यसे।

* पर...आक्षेपात् परार्थस्य परहितस्य सम्पादने साधने यो रसः अनुरागः तस्य आक्षेपात् आकर्षणात् हेतोः। बाधितुं पीड़यितुं। मर्म्मच्छेदिन्यः "मर्म्म जीवस्थान"मिति राजनिर्घण्टः, तस्य छेदिन्यः वियोजिन्यः "सन्निपातः शिरास्नायुसन्धिमांसास्थिसम्भवः। मर्म्माणि तेषु तिष्ठन्ति प्राणाः खलु विशेषत" इति भावप्रकाशः।

† वदति मत्पतिरिति शेषः। विपद्यते म्रियत इत्यर्थः।

‡ परित्यक्तुकामः परित्यक्तुं कामो यस्य सः "तुम् काममनसोरपीति" मकारलोपः।

गात्राणीति। अमूनि मदीयानीत्यर्थः गात्राणि अङ्गानि सचेतनत्वं संज्ञाविशिष्टत्वं न वहन्ति धारयन्ति ("शरीरस्य न चैतन्यं मृतेषु व्यभिचारत" इत्युक्तेः अङ्गानां चैतन्यमसम्भवमत्र तु धर्म्मोपचाराल्लौकिक-

श्रोत्रं स्फुटाक्षरपदां न गिरं शृणोति।
कष्टं निमीलितमिदं सहसैव चक्षुः
हा तात यान्ति विवशस्य ममासवोऽमी॥ (१)

अथवा संरक्षता पन्नगम् (इत्यादि पठित्वा पतति)। *

वृद्धा। हा पुत्त हा वच्छ हा गुरुअणवच्छल कहिंसि देहि मे पड़िवअणं। (२)

जीम॰। हा वत्स जीमूतवाहन हा प्रणयिजनवल्लभ हा सर्वगुणनिधे क्वासि देहि मे प्रतिवचनम्।(इत्यूर्द्ध्वमवलोक्य)कष्टं भोः कष्टम्।

निराधारं धैर्य्यं कमिव शरणं यातु विनयः
क्षमः क्षान्तिं वोढुं क इह विरता दानपरता।
हृतं सत्यं सत्यं व्रजतु च कृपा क्वाद्य कृपणा

---

(२) हा पुत्र हा वत्स हा गुरुजनवत्सल क्वासि। देहि मे प्रतिवचनम्।

प्रसिद्धिमाश्रित्योक्तमित्यतुसन्धेयमिति) श्रोत्रं कर्णः स्फुटाक्षरपदां स्फुटानि अक्षराणि येषु तानि तथोक्तानि पदानि सुप्तिङन्तादीनि यस्यां सा तां तथोक्तां गिरं वाक्यं न शृणोति। कष्टं इदं चक्षुः सहसैव निमीलितं मुद्रितं दर्शनाद्विरतमिति यावत्, हा तात हा पितः (अत्र हाशब्देन ताद्दशयोगाभावात् न तात इत्यत्र द्वितीया तर्हिं तु तातः शोच्य इतोवमर्थ आयाति) विवशस्य स्वायत्ततारहितस्य मम अमी असवः प्राणाः यान्ति निर्गच्छन्ति अहं म्रिये इत्यर्थः। वसन्ततिलकवृत्तम्। (१)

* संरक्षता पन्नगमित्यादिकं श्लोकमित्यर्थः।

निराधारमिति। धैर्य्यं निराधारं नास्ति आधारः निवासस्थानं यस्य तत् तथोक्तं जातमिति शेषः, विनयः कमिव जनमिति शेषः शरणं रक्षितारं यातु प्राप्नोतु न कमपीत्यर्थः, को जनः क्षान्तिं क्षमागुणं वोढुं धारयितुं क्षमः शक्तः "क्षमं शक्ते हिते त्रिषु" त्यमरः, न कोऽप्येताद्दशक्षमावानस्तीत्यर्थः, इह जगति दानपरता दानशीलत्वं विरता निवृत्ता अतःपरं दानादिकं न भविष्यति दातुरभावादिति भावः, सत्यं सत्यवादित्वं वस्तं निश्चितमित्यर्थः हृतं लुप्तं नेदृशः सत्यवादी कश्चिदस्तीति भावः, कृपा दया अद्य अधुना कृपणा दीना सती क्व कुत्र व्रजतु

जगज्जातं शून्यं त्वयि तनय लोकान्तरगते ॥ (१)

मल । हा अज्जउत्त कहं परिचइअ गदोसि । अदि णिग्घिणी मलअवदि किं तए पेक्खिदव्वं । जा एत्तिअं वेलं जीविआसि । (२)

शंख । हा कुमार कथं प्राणेभ्योऽपि वल्लभं जनं परित्यज्य गम्यते । तदवश्यमन्वेति त्वां शङ्खचूड़ः † ॥

गरुड़ः । कष्टमुपरतोऽयं महात्मा‡ । तत् किमिदानीं करोमि ॥

वृद्धा । (साश्रमूर्द्ध्वमवलोक्य) भअवन्तो लोअपाला कहम्मि अमिदेण सेञ्चिअ पुत्तअं मे जीआवेहि । (३)

गरुड़ः । (सहर्षमात्मगतम्) अये अमृतसंकीर्त्तनात् साधु स्मृतम् । मन्ये प्रनष्टमयशः †† । तद् यावत् त्रिदशपतिमभ्यर्थ्य तद्विसृष्टेनामृतवर्षेण न केवलं जीमूतवाहनमेतानपि पूर्वभक्षितानशेषानुरगपतीन् प्रत्युज्जीवयामि । यदि न ददात्यसौ तदाहं

---

(२) हा आर्य्यपुत्र कथं परित्यज्य गतोऽसि । अतिनिर्घृणे मलयवति किं * त्वया प्रेक्षितव्यं या एतावद्वेलं जीवितासि ।

(३) भगवन्तो लोकपालाः** कथममृतेन सिक्त्वा पुत्रकं मे जीवय ।

गच्छतु कं शरणं लभतामित्यर्थः, हे तनय पुत्र त्वयि लोकान्तरगते लोकान्तरं स्वर्गमित्यर्थः गते प्राप्ते सति जगत् पृथिवी शून्यं गुणादिभिरिति शेषः जातं भूतम् । शिखरिण्योवृत्तमेतत् । (१)

* किं वज्रादपि दारुणतरमित्यर्थः ।

† वल्लभं प्रियं । अन्वेति अनुगच्छति ।

‡ उपरतः मृतः । कष्टमिति विषादसूचकमव्ययम् ।

**लोकपालाः दिगधिपतयः "इन्द्रो वह्निः पितृपतिर्निर्ऋतिर्वरुणोऽनिलः । धनदः शङ्करश्चैव लोकपालाः पुरातना" इति वह्निपुराणम् ।

†† प्रनष्टं अपगतमसत्वान्न नोषः । अयशः अख्यातिः जीमूतवाहनभक्षणरूपमित्यर्थः ।

पक्षैः पीत्वाम्बुनाथं पटुतरजवनैः प्रेर्य्यमाणैः समीरैः
नेत्राग्निप्लोषमूर्च्छाविधुरविनिपतत्भानवद्वादशार्कः।
चञ्च्वा सञ्चूर्ण्य शक्राशनिधनदगदाप्रेतलोकेशदण्डान्
आजौ निर्जित्य देवान् अयममृतमयं वर्षमभ्युत्सृजामि ॥(१)

तदयं गतोऽस्मि। (इति साटोपं * परिक्रम्य निष्क्रान्तः)।

जोमू। वत्स शङ्खचूड किमद्यापि स्थीयते। समाहृत्य दारूणि पुत्रस्य मे विरचय चितिम्†। येन वयमप्यनेन सहैव गच्छामः॥

हद्धा। पुत्त संखचूड लहुं सज्जेहि। दुक्खं अच्छेहिं विणा भाउणो दे चिट्ठदि।(२)

शंख। (सास्रम्) यदाज्ञापयन्ति गुरवः। नन्वग्रग एवाहं युष्माकम्। (उत्थाय चितारचनां कृत्वा) तात अम्ब सज्जीकृतेयं चिता॥

(२) पुत्र शङ्खचूड लघु सज्जय। दुःखमस्माभिर्विना भ्राता ते तिष्ठति।

पक्षैरिति। पटुतरजवनैः पटुतरमतिनिपुणं जवनं जवः वेग इत्यर्थः "रंहस्तरसी तु रयः स्यदः। जव" इत्यमरः येषां तैः समीरैः वायुभिः प्रेर्य्यमाणैः सञ्चार्य्यमाणैः पक्षैः करणैः अम्बुनाथं समुद्रं पीत्वा अतिशीघ्रमुल्लङ्घ्येत्यर्थः नेत्र...र्कः नेत्रयोः स्वनयनयोरग्निना यः प्लोषः दाहः तेन जनिता या मूर्च्छा मोहः अथवा तस्य या मूर्च्छा प्रसरः (cf. Raghuvansa, "नपादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्च्छति मारुतस्येति) तया विधुरा विक्लवा अतएव निपतन्तः आकाशादिति शेषः भानवः सवितारः द्वादश अर्काः सूर्य्याः यस्य स तथोक्तः शक्र...दण्डान् शक्रस्य इन्द्रस्य अशनिः वज्रं धनदस्य कुबेरस्य गदा प्रेतलोकेशस्य यमस्य दण्डः तान् चञ्च्वा करणेन संचूर्ण्य चूर्णीकृत्य आजौ युद्धे देवान् निर्जित्य पराभूय अयम् अमृतमयं अमृतप्रचुरं (तत्प्रकृतवचने मयट्) वर्षं वृष्टिं अभ्युत्सृजामि पातयामि अहमिति शेषः। अत्र स्रग्धरावृत्तम्। (१)

*साटोपं आटोपेन गर्वेण सह वर्त्तमानम्।

† दारूणि काष्ठानि "काष्ठं दार्वि"त्यमरः। चितिं दाहोपयोग्यकाष्ठचयम्।

जीमू । देवि किमपरं क्रियते । तदुत्तिष्ठ चितायामारोहामः । (सर्वे उत्तिष्ठन्ति) ।

मल । (बद्धाञ्जलिरूर्द्धं पश्यन्ती) भअवदि गोरि तुए आणत्तं जहा विज्जाहरचक्कवट्टी भत्ता ते भविस्सदित्ति ता कहं मम मन्दभग्गाए कदे तुमं अलिअवअणा संवुत्ता । (१)

(ततः प्रविशति ससम्भ्रमा गौरी) ।

गौरी । महाराज जीमूतकेतो न खलु साहसमनुष्ठातव्यम् ।

जीमू । अये कथममोघदर्शना † गौरी ।

गौरी । (मलयवतीमुद्दिश्य) वत्से कथमहमलीकवादिनी* भवेयं (नायकमुपसृत्य कमण्डलुजलेनाभ्युक्ष्य ‡)

निजेन जीवितेनापि जगतामुपकारिणः ।
परितुष्टास्मि ते वत्स जीव जीमूतवाहन ॥ (२)

नायकः । (उत्तिष्ठति) ।

जीमू । (सहर्षम्) देवि दिष्ट्या वर्द्धसे । प्रत्युज्जीवितो वत्सः ।

वृद्धा । भअवदीए पसादेण ।(२)

नायकः । (गौरीं दृष्ट्वा बद्धाञ्जलिः) अये कथममोघदर्शना भवगती ।

---

(१) भगवति गौरि त्वया आज्ञप्तम् । विद्याधरचक्रवर्त्ती भर्त्ता ते भविष्यतीति । तत् कथं मम मन्दभाग्यायाः कृते त्वमलीकवचना संवृत्ता ।

(२) भगवत्याः प्रसादेन ।

---

* अलीकवचना मिथ्यावादिनी ।

† अमोघदर्शना अमोघमव्यर्थं दर्शनं यस्याः सा तथोक्ता ।

‡ अभ्युक्ष्य आर्द्रीकृत्य ।

निजेनेति । निजेन स्वकीयेन जीवितेन प्राणैरपि का कथान्यैरित्यपेरर्थः जगतामुपकारिणः ते तव (विवक्षया षष्ठी) परितुष्टा प्रीतास्मि अहमिति शेषः, हे वत्स जीमूतवाहन जीव प्राणान् पुनर्लभस्व त्वमिति शेषः । (२)

अभिलषिताखिलवरदे प्रणिपतितजनार्त्तिहारिणि शरण्ये ।
चरणौ नमाम्यहं ते विद्याधरवन्दिते गौरि ॥ (१)

(इति गौर्य्याः पादयोः पतति । सर्वे अञ्जलिं बध्नन्ति)।

जीमू। अये कथमनभ्रा वृष्टिः*। भगवति किमेतत् ॥

गौरी। राजन् जीमूतकेतो जीमूतवाहनं प्रत्युज्जीवयितुमेतांश्चास्थिशेषान् उरगपतीन् समुपजातपश्चात्तापेन † पक्षिपतिना देवलोकादियममृतवृष्टिः पातिता। (अङ्गुल्या निर्दिश्य) किं न पश्यति भवान्।

सम्प्राप्ताः शङ्खचूडं स्फुटमणिकिरणैर्भासुरैरुत्तमाङ्गैः
जिह्वाकोटिद्वयेन क्षितिममृतरसास्वादलोभाल्लिहन्तः ।
सम्प्रत्याबद्धवेगा मलयगिरिसरिद्वारिपूरा इवैते

अभिलषितेति। हे अभिलषिताखिलवरदे अभिलषितान् इष्टान् अखिलान् सर्वान् वरान् ददातीति प्रणिपतितजनार्त्तिहारिणि प्रणिपतितानां नतानां जनानां आर्त्तीः क्लेशान् हरतीति शरण्ये शरणे साधुः तत्सम्बुद्धौ (तत्र साधुरिति यत्) विद्याधरवन्दिते विद्याधरैः पूजिते गौरि शङ्करि, अहं ते तव चरणौ पादौ नमामि नमस्करोमि । (१)

* अनभ्रा नास्ति अभ्रं मेघः यस्यां सा तथोक्ता ।

† अस्थिशेषान् अस्थीन्येव शेषाणि अवशिष्टानि येषां ते तान्। समुपजातपश्चात्तापेन समुपजात उपस्थितः पश्चात्तापोऽनुतापो यस्य स तथोक्तेन ।

सम्प्राप्ता इति। स्फुटाः प्रकाशमानाः मणीनां शिरःस्थरत्नानां ये किरणास्तैः करणैः भासुरैः दीप्तिमद्भिः (भञ्जभासमिदो घुरचितिभासेर्घुरच्) उत्तमाङ्गैर्मस्तकैर्विशिष्टा इत्यर्थः शङ्खचूडं सम्प्राप्तास्तेन मिलिता इत्यर्थः अमृतरसास्वादलोभात् अमृतरसस्य आस्वादस्य लोभाद्धेतोः जिह्वाकोटिद्वयेन जिह्वाग्रभागद्वयेन क्षितिं भूमिं लिहन्तः सम्प्रति अधुना आबद्धवेगा उभयत्रापि प्राप्तरया इत्यर्थः एते दृश्यमाना इत्यर्थः विषधरपतयः सर्पपतयः मलयगिरिसरिद्वारिपूरा मलयपर्वतनि:

वक्रैः प्रस्थानमार्गैर्विषधरपतयस्तोयराशिं विशन्ति ॥(१)

(नायकमुद्दिश्य) वत्स जीमूतवाहन न त्वं जीवितदानमात्रस्यैव योग्यः। तदयमपरस्ते प्रसादः।

हंसांसाहतहैमपङ्कजरजःसम्पर्कपङ्कोक्षितै-
रुत्पन्नैर्मम मानसादुपनतैस्तोयैर्महापावनैः।
स्वेच्छानिर्म्मितरत्नकुम्भनिहितैरेषाभिषिच्य स्वयं
त्वां विद्याधरचक्रवर्त्तिनमहं प्रीत्या करोमि क्षणात् ॥(२)

अपि च

अप्सरीभवतु काञ्चनचक्ररत्न-
मेष द्विपश्च धवलैश्चतुर्भिः।

स्रुतानां नदीनां वारिपूरा जलप्रवाहा इव वक्रैः प्रस्थानमार्गैः गमनपथैः तोयराशिं समुद्रं विशन्ति। स्रग्धरावृत्तमेतत्। (१)

हंसेति। हंस...उक्षितैः हंसानां अंसैः स्कन्धदेशैः आहतानां हेमपङ्कजानां स्वर्णपद्मानां रजोभिः सम्पर्कौ यत्र तथोक्तेन (जलविशेषणं वा) पङ्केन उक्षितैः मम मानसात् सरसादित्यर्थः उत्पन्नैः उपनतैरुपस्थितैः महापावनैरतिपवित्रैः स्वेच्छा...निहितैः स्वेच्छया निर्म्मितेषु रत्नकुम्भेषु रत्नानां कुम्भेषु कलसेषु (रत्ननिर्म्मितेष्विति वा मध्यपदलोपोऽत्र विभाव्यः) निहितैः स्थापितैः तोयैः जलैः करणैः एषाहं स्वयं त्वामभिषिच्य प्रीत्या आनन्देन क्षणात् शीघ्रमेव विद्याधरचक्रवर्त्तिनं करोमि। शार्दूलविक्रीडितवृत्तमिदम्। (२)

अप्से इति। काञ्चनचक्ररत्नं स्वर्णनिर्मितचक्रं रत्नञ्च अथवा स्वर्णचक्रमेव "जातौ जातौ यदुत्कृष्टं तद्रत्नमिति कथ्यते।" चतुर्भिः धवलैः श्वेतैः दशनैः दन्तैः विशिष्ट इत्यर्थः एष द्विपः द्वाभ्यां पिबतीति हस्ती च ऐरावत इत्यर्थः (स तु एकवर्णश्चतुर्दन्तः) अप्सेसरीभवतु अप्से सरति गच्छतीति अप्सेसरः (तत् पुरुषे कृति बहुलमिति सप्तम्या अलुक्) अनप्से

श्यामो हरिर्मलयवत्यपि चेत्यमूनि
रत्नानि मे समवलोकय चक्रवर्त्तिन् ॥ (१)

अपिच आलोकयन्तामभी शारदशशाङ्कनिर्म्मलवालव्यज-
नहस्ता मणिमरीचिरचितेन्द्रचापभङ्गयो भङ्गिनमितपूर्वार्द्ध-
कायाः * प्रणमन्ति नमन्ति च मतङ्गहतकादयो विद्याधर-
पतयः । तदुच्यतां किं ते भूयः प्रियमुपकरोमि ॥

नायकः । अतः परमपि प्रियमस्ति ॥

त्रातोऽयं शङ्खचूड़ः पतगपतिभयाद्वैनतेयो विनीत
स्तेन प्राग्भक्षिता ये विषधरपतयो जीवितास्तेऽपि सर्वे ।
मत्प्राणाप्त्या च मुक्ता न गुरुभिरसवश्चक्रवर्त्तित्वमाप्त

रः अप्सेश्वरः भवत्विति । हे चक्रवर्त्तिन् श्यामः नीलः हरिः हरिवर्णः मलयवती च इति मे मम अमूनि रत्नानि समवलोकय पश्य त्वमिति शेषः । वसन्ततिलकवृत्तमेतत् । (१)

* शारद···हस्ताः शारदः शरत्कालीनः यः शशाङ्कश्चन्द्रस्तद्वत् निर्म्मलं शुभ्रं वालव्यजनं चामरमित्यर्थः हस्ते येषां ते तथोक्ताः, मणि···भङ्गयः मणीनां अलङ्कारार्थगृहीतानां रत्नानां मरीचिभिः करणैः रचिता कृता इन्द्रचापस्य इन्द्रधनुषः भङ्गयः भङ्गयः यैस्ते तथोक्ताः भङ्गि···कायाः भङ्ग्या नमिता पूर्व्वार्द्धकायाः (अर्द्धानि कायानामिति अर्द्धनपुंसकमिति एकदेशिसमासः) यैः ते तथोक्ताः ।

त्रात इति । अयं शङ्खचूड़ः पतगपतिभयात् गरुड़भयात् त्रातः रक्षितः वैनतेयः गरुड़ः विनीतः शिक्षितः वशीकृत इत्यर्थः तेन गरुड़ेन ये विषधरपतयः प्राक् पूर्वं भक्षिताः ते सर्वेऽपि जीविताः । मत्प्राणाप्त्या मम जीवनलाभेन हेतुना गुरुभिः पित्रादिभिः असवः प्राणाश्च न मुक्ताः त्यक्ताः चक्रवर्त्तित्वमाप्तं लब्धं मयेति शेषः हे देवि ! गौरि त्वं साक्षात् प्रत्यक्षं दृष्टा मयेति शेषः । अतः अस्मात् अपरमन्यत् किं पुनः प्रियमस्तीति शेषः यत् सुखमिति शेषः प्रार्थ्यसे याच्यसे त्वं मयेति शेषः ।

साक्षात् त्वं देवि दृष्टा प्रियमपरमतः किं पुनः प्रार्थये यत्॥(१)

तथापीदमस्तु । (भरतवाक्यम्)

वृष्टिं हृष्टशिखण्डिताण्डवकृते मुञ्चन्तु काले घनाः
कुर्वन्तु प्रतिरूढसन्ततहरितसस्योत्तरीयां क्षितिम् ।
चिन्वानाः सुकृतानि वीतविपदो निर्मत्सरैर्मानसैः
मोदन्तां सततञ्च बान्धवसुहृद्गोष्ठीप्रमोदाः प्रजाः ॥ (२)

इति निष्क्रान्ताः सर्वे ।

पञ्चमोऽङ्कः ।

(याच्ञार्थत्वादप्रधाने कर्म्मणि नट् तदुक्तं "प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् । अप्रधाने दुहादीनां ण्यन्ते कर्त्तुश्च कर्म्मणः" इति) । (१)

भरतवाक्यं भरतस्य नाटकसूत्रकर्त्तुः मुनेः वाक्यम् ।

वृष्टिमिति । हृष्ट...कृते हृष्टैः उन्मदैः शिखण्डिभिः मयूरैः ताण्डवस्य नृत्यस्य "ताण्डवं नटनं लास्य"मित्यमरः कृते करणे यत्र तथोक्ते अथवा कृतं हृष्टशिखण्डिभिः ताण्डवं यत्रेति विग्रहः (आहिताग्न्यादित्वात् परनिपातः) काले वर्षास्वित्यर्थः घना मेघा वृष्टिं मुञ्चन्तु पातयन्तु । क्षितिं पृथिवीं प्रति... उत्तरीयां प्रतिरूढानि जातानि सन्ततानि अविच्छिन्नानि हरिन्ति हरिद्वर्णानि सस्यान्येव उत्तरीयं उत्तरीयवस्त्रं यस्याः सा तां तथोक्तां शस्यपूर्णामित्यर्थः कुर्वन्तु, प्रजा जनाः सुकृतानि पुण्यानि चिन्वानाः संगृह्णन्तः वीतविपदः वीताः गता विपदो यासां ता विपद्रहिताः बान्धव...प्रमोदाः बान्धवाश्च सुहृदश्च ("आत्मीयसहजो बन्धुः सदैवानुमतः सुहृदि"ति) गोष्ठ्यः परीवाराश्च तासां तेषां प्रमोदः आनन्दः यासां तास्तथोक्ताः सत्यः सततञ्च निर्मत्सरैः निर्द्वेषैः मानसैः मनोभिः मोदन्तां आनन्दमनुभवन्तु । अत्र वृत्तं शार्द्दूलविक्रीडितम् । (२)

समाप्तञ्चेदं नागानन्दं नाम नाटकम् ॥